यदिति । यत्ते सुजातमति कोमलं । भीता: कर्कशस्तनस्पर्शात् (न्) मा(र)स्य सौकुमार्य्यमभाङ्क्षीदिति भयम् । तेन चरणाम्बुरुहेण । अटवीं अरण्यम् । यद् यदा नयसि (न यच्छसि) गच्छसि । नयोप-गताविति य (अ)कारान्लोप्यस्ति । "यत्तदो: नित्यसम्बन्धात्" ।

वामबाहुकृतवामकपोलो-
वल्गितभ्रूरधरार्पितवेणुम्।
कोमलाङ्गुलिभिराश्रितमार्गम्,
गोप्य ईड्यति यत्र मुकुन्दः ॥४०॥
व्योमयानवनिताः सहसिद्ध-
विस्मितास्तदुपधार्य सलज्जाः।
काममार्गणसमर्पितचित्ताः,
कश्मलं ययुरपस्मृतनीव्यः ॥४१॥

तदास्माकं बुद्धिर्भ्रमति किमिति कूर्पादिभिः सूक्ष्मोपलादिभिः किंस्विन्नव्यथते किं स्विदिति वितर्के। भवान् आयुर्ष्यासां स्तास्तथा। गोप्यः श्रीकृष्णम्॥ १०।३१।१९ (३९)

अथ द्वाविंशत्या श्लोकैः प्रवासमाह। वामबाहुरिति। अत्र चैकादशयुगलानां प्राग्वच्च वर्णत्रिवर्गनिर्वाहः। प्रवासत्वे तु गोप्यः। "(श्रीमत्) कृष्णे वनं याते तमनुद्रुतचेतसः। कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान्"(१) इति गमकम्। इदं चरणभ्रमणैर्लक्षितं स्वागताख्यं च्छन्दः। वामबाहौ कृतो निहितो वामः कपोलो येन। वल्गिते किञ्चिदुच्चलिते भ्रुवौ यस्य स तथा। कोमलाभिरङ्गुलीभिराश्रिताः स्पष्टामार्गाः। षड्जादिस्वरव्यञ्जकानि स्थानानि यस्मिन् वेणौ तम्। यत्र यदा ईड्यति वादयति हे गोप्यः। अचाद्य पादयोर्व्वकारः आदिः कृत इति चित्रम्॥ १०।३५।२ (४०)

व्योमेति। तदा व्योमयानवनिताः खेचर-स्त्रियः। तद्वेणुवादनकामस्य मार्गणाः सम्मोहनादयः पञ्चशराः स्तेषां समर्पितम्। तद्-

---

(१) भागवतं १०।३५।१ श्लोकः।

हन्तचित्रमबला: शृणुतेदम्,
हारहास उरसिस्थिरविद्युत्।
नन्दसूनुरयमार्त्तजनानाम्,
नर्म्मदोयर्हि कूजितवेणुः ॥४२॥
वृन्दशोव्रजवृषामृगगावो-
वेणुवाद्यहृतचेतस आरात्।
दन्तदष्टकवला धृतकर्णाः,
निद्रिता लिखितचित्रमिवासन् ॥४३॥

शीभूतं चित्तं यासाम्। कश्मलं मोहः। अपस्रु(स्रं)ताधिथिलो(श्लथो) भूतानीवो यासां ताः। अतएव वेणुगीतोद्दीपित स्वभावस्य नीवीश्लथत्वेन प्रकटितत्वात् सलज्जाः। अत्राद्ययोर्व्वकारः। अन्त्ययोः ककारः॥ १०।३५।३ (४१)

हन्तेति। हन्त चित्रं हे अबलाः (शृणुतेदम्) हारवद् विशदो-हासो यस्य। विशदाद्युद्गतिर्यस्याः सा विद्युल्लक्ष्मीः उरसिस्थिता यस्य। "अमूर्द्धमस्तकात् स्वाङ्गादकामे" (१) इत्यलुक्। नर्म कौतुकम्। यर्हि यदा कूजित वेणुः वेणुं कूजयति। अत्राद्ययो-र्हकारः। अन्त्ययानेकारः॥ १०।३५।४ (४२)

वृन्दश इति। वाद्यं वादनम्। भावेक्त्यः। आराद् निकटे। दन्तैर्दृष्टा न तु निगीर्णाः कवला यैः। धृतकर्णा वेणुगीते दत्तावधानाः। निद्रिता इति "तारकादित्वादितच्" (२)। निद्रितानामपि किञ्चिच्चलनमुपलभ्यते। अत्र तु तदपि नास्तीति वक्तुमुद्यमान्तरं लिखितग्रहणम्। स्मितं भ्रमनिवृत्त्यर्थम्। अत्राद्ययोर्व्वकारः॥ १०।३५।५ (४३)

(१) पाणिनिः ६।३।१२ सूत्रम्। (२) पाणिनेः तारकादिभ्यो विहितेतच् प्रत्यय सूत्रम्।

वर्हिण स्तवकधातुपलाश-
बर्ह्ममल्लपरिवर्ह विड़म्बः ।
कर्हिचित् सवल आलि सगोप-
र्गाः समाह्वयति यत्र मुकुन्दः ॥४४॥
तर्हि भग्नगतयः सरितो वै,
तत्पदाम्बुजरजोऽनिलनीतम् ।
स्पृहयतिर्वयमिवाबजपुष्याः,
प्रेमवेपितभुजास्तिमितापः ॥४५॥

वर्हिण इति। वर्हिणो मयूरा विद्यन्ते स्वामितया येषां तानि वर्हिणानि मयूरपिच्छानि। "अर्शआदिभ्यादच्" (१)। स्तवकाः पुष्पगुच्छाः। धातुर्मनःशिलादि। पलाशं पत्रं तैर्बर्हाणां रचितः। मल्लपरिवर्हाणां मल्लोपकरणानाम् विड़म्बोऽनुकारो येन। कर्हिचित् कदाचित्। एवं विचित्रमित्यर्थः। आलि-वयस्यः बलो बलभद्रः। अत्राद्ययोर्वकारः॥ १०।३५।६ (४४)

तर्हीति। तर्हि तदानीम्। भग्नगतयः मच्छ्रातजाड्यमच्चारि भावत्वात्। तस्य मुकुन्दस्य। अनिलेन दूतीभूतेन नीतं प्रापितम्। वैशब्द उत्प्रेक्षायाम्। निष्कारणा नदीवृत्तिः सकारणत्वेनोत्प्रेक्ष्यते। उत्प्रेक्षायाञ्च भगवतः सरिताञ्च भर्तृ-पत्नी। सम्यगवहारमारोप्य-व्यङ्ग्यः॥ स्पृहयतोः स्पृहयन्त्यः। रज.स्पृहयतोरिति द्वितीयानिर्देशो रजसः ईप्सिततमत्वविवक्षया। अन्यथाहि "(२) स्पृहेरीप्सित" इति

---

(१) पाणिनिः ५।२।१२७ सूः।

(२) पाणिनिः २।३।१३ सूः।

अनुचरैः समनुवर्णितवीर्य-
आदिपुरुष इवाचल भूतिः ।
वनचरो गिरितटेषु चरन्ती-
र्वेणुनाह्वयति गाः स यदा हि ॥४६॥
वनलतास्तरव आत्मनि विष्णुम्,
व्यञ्जयन्त्य इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः,
प्रेमहृष्टतनवो ववृषुः स्म॥४७॥

सम्प्रदानत्वे चतुर्थ्या भाव्यम् । अवहुपुण्यावयमिवेति । यथा वयं तत्-पादरजः स्पृहयामो न तु प्राप्नुमः । अवहुपुण्यत्वात् तथैता इति । स्पृहामात्रे खट्टष्टान्तो नत्वप्राप्तौ । नदीभिः (अपि बहुशः) प्राप्त-त्वात् । गोपीभिरपि बहुशः प्राप्तत्वेऽपि क्षणं विप्रलम्भासहत्वाद-प्राप्तबुद्धिः । प्रेम्ना वेपिताविनम्रीभूताः भुजोर्मिरूपा यासां ताः । (स्तिमिता निश्चलाः) आभ्यां कम्पस्तम्भौ शृङ्गारानुभावावुक्तौ । अत्राद्ययोस्तकारः ॥ १०।३५।७ (४५)

अनुचरैरिति । भूतिरैश्वर्यम् । स कृष्णः । अत्राद्ययोरवर्णाः (गः) अन्त्ययोर्वः ॥ १०।३५।८ (४६)

चिरमनुशीलानां स्वस्मिन् अभिव्यक्तिमाह वनलतेति । भारेण प्रणताः प्रणतभाराः ते विटपा येषां । मधुधारा क्षीरधाराः मिषा-दानन्दाश्रूणीत्यर्थः । हृ(ट)ष्टतनव उद्भिन्नवत्कात् । अत्रादाद्योर्व-कारः (अन्त्ययोः प्रशब्दः) ॥ १०।३५।९ (४७)

दर्शनीयतिलकोवनमाला-
दिव्यगन्धतुलसी मधुमत्तैः ।
अलिकुलैरलघुगीतमभीष्ट-
माद्रियन् यर्हि सन्धित वेणुः ॥४८॥
सरसि सारस हंसविहङ्ग-
श्चारुगीतहृतचेतस (एत्य) आरात् ।
हरिमुपासत ते यतचित्ता-
हन्त मीलितदृशो धृत मौनाः ॥४९॥
सहबलः सगवतंस विलासः,
सानुषुञ्जितिभृतो व्रजदेव्यः ।
हर्षयन् यर्हि वेणुरवेण,
जातहर्ष उपरम्भति विश्वम् ॥५०॥

दर्शनीयेति वनमालायां या दिव्यगन्धा तुलसी तस्या मधुना परिमलेन मत्तैर्भ्रमरैरलघुदीर्घं यद् गीतम् तद् आद्रियन् तस्यादरं कुर्व्वन्। यर्हि यदा सन्धित अधरेण कृतसन्धानो वेणुर्येन स तथा। अत्राद्ययोर्दः (हँः) अन्त्ययो रेफः (रवर्णः) ॥ १०।३५।१० (४८)

सरसीति। हन्त हे सखि! आद्ययोः सः अन्त्ययोः हँः ॥ १०।३५।११ (४९)

सहेति। सगवतंसाभ्यां मालाकर्णपुराभ्यां विलासः शोभा यस्य स तथा। हे व्रजदेव्यः! वेणुरवेण विश्वं हर्षयन् जातहर्षो यर्हि स्वयमुपरम्भति आनन्देन स्वयं शब्दं करोति। आद्ययोः सः ॥ १०।३५।१२ (५०)

महदतिक्रमण शङ्कितचेता-
मन्दमन्दमनुगर्ज्जति मेघः ।
सुहृदमभ्यवर्षत् सुमनोभिः,
छायया च विदधत्प्रतपत्रम् ॥५१॥
विविधगोपचरणेषु विदग्धो-
वेणुवाद्य उरुधा निज शिक्षाः ।
तव सुतः सति यदाधरबिम्बे-
दत्तवेणु रनयत् स्वरजातीः ॥५२॥
सवनशस्तदुपधार्य्य सुरेशाः,
शक्रशर्व्वपरमेष्ठि पुरोगाः ।

महदिति । महत्शब्देनास्य शब्दस्तिरस्कृतोमाभूत् इति शङ्का । अतो मन्दं मन्दं गर्ज्जति । अनु तच्छब्दितानन्तरं सुहृदं कृष्णम् । सुमनोभिः पुष्पैः प्र(आ)तपत्रम् च्छत्रम् । आद्ययोर्मः अन्त्ययोः सः ॥ १०।३५।१३ (५१)

विविधेति । चरणं चर्य्या क्रीड़ेत्यर्थः । वाद्यं वादनम् । उरुधा बहुधा । हे सति यशोदे ! तव सुतो यदा स्वरजातीः (१) षड्-जादिप्रभेदाननयद् उद्भावितवान् । निजा स्वप्रज्ञोत्प्रेचिता शिक्षा-संप्रदायो यासु स्वरजातिषु । आद्ययोर्व्वः ॥ १०।३५।१४ (५२)

सवनश इति अनुसन्दधत् । तत्तथाविधं गीतम् । शर्वो रुद्रः (२) आनता कन्धरा चित्तञ्च येषाम् । चित्तपूर्वकं प्रणेमुरित्यर्थः ।

---

(१) अमर—स्वर्गवर्ग—सप्तम परिच्छेदः ।

(२) "शर्व्वः शर्व्वश्च शङ्करः" इति विश्वप्रकाशः ।

कवय आनतकन्धरचित्ताः,
कश्मलं ययुरनिश्चिततत्त्वाः ॥५३॥
निजपदाब्जदलैर्ध्वजवज्र-
नीरजाङ्कुशविचिचललामैः ।
ब्रजभुवः शमयन् खुरतोदम्,
वर्ष्मधुर्य्यगतिरिड़ोत वेणुः ॥५४॥
ब्रजति तेन वयं स विलास-
वीक्षणार्पित मनोभववेगाः ।
कुजगतिङ्गमितानविदामः,
कश्मलेन कवरं वसनं वा ॥५५॥
मणिधरः क्वचिदागणयन् गा-
मालया दयितगन्धतुलस्याः ।

कश्मलं मोहः । कस्य खरस्यायं प्रभेदो गीयत इति निश्चयाभावाद् मोहः । आदयोः शः । अन्त्ययोः कः ॥ १०।३५।१५ (५३)

निजेति । दलैरवयवैः नीरजं पद्मम् । ध्वजादयो विचित्राणि ललामानि चिह्नानि येषाम् । खुरतोदं खुरव्यथाम् । वर्ष्मणा देहेन धुर्य्यः श्रेष्ठो गज इति यावत् तद्वद्गतिर्यस्य । स तथा । आद्ययोर्नः अन्त्ययोर्व्वः ॥ १०।३५।१६ (५४)

ब्रजतीति । यद् ब्रजति तेनेत्यर्थः । सविलासं स शोभं यद्वीक्षणम् । तेनार्पितो मनोभववेगो यासां । कुजगतिं गमिताः । द्रुमवज्जड़ीभूताः । कवरं केशपाशं । आद्ययोर्वः अन्त्ययोः कः ॥ १०।३५।१७ (५५)

प्रणयिनोऽनुचरस्यकदांसि,
प्रक्षिपन् भुजमगायत यत्र ॥५६॥
क्वणित वेणुरव वञ्चितचित्ताः,
कृष्णमन्वसत कृष्णगृहिण्यः ।
गुणगणार्णमनुगत्य हरिण्यो-
गोपिका इव विमुक्त गृहाशाः ॥५७॥
कुन्ददाम कृतकौतुकवेषो-
गोप गोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे ! तववत्सो-
नर्मदः प्रणयिनां विजहार ॥५८॥
मन्दवायुरुपवात्यनुकूलम्,
मानयन् मलयजस्परशेन ।

मणीति । मणयः काचघटितादयः । दयितो गन्धो यस्याः । तुलस्याः तस्या मालया विशिष्टः । प्रणयिनः प्रियस्य कदा कर्ह्यपि । आद्ययोर्मः । अन्त्ययोः प्रश्नवः ॥ १०।३५।१८ (५६)

क्वणितेति । कृष्णं अन्वसत । अनुगता आसन् । कृष्णस्य मृगस्य हरेश्च गृहिण्यः गुणगणस्य अर्णमर्णवम् । गोपिका इव हरिण्यो विरहपाण्डुराः । आद्ययोः कः अन्त्ययोर्गः ॥ १०।३५।१९ (५७)

कुन्देति । दाम माला हे अनवद्ये ! यशोदे ! । यदा विजहार तदा मलयजस्य चन्दनस्य स्पर्शेन विशिष्टो वायुरुपसमीपे वाति । उपदेवा विद्याधरादयः । वादयादिभिर्विशिष्टाः । प्रथमे अन्त्ययोर्नकारः । द्वितीये आद्ययोर्मः । अन्त्ययोर्वयोरैक्याद्वः ॥१०।३५।२०(५८)

वन्दिन स्तमुपदेवगणा ये,
वाद्यगीतबलिभिः परिवव्रुः ॥५९॥
वत्सलो व्रजगवां यदगश्रो-
वन्द्यमानचरणः पथि वृद्धैः ।
वत्स (क्रतत्स) गोधनमुपोह्य दिनान्ते,
गीतवेणुरनुगेड़ितकीर्त्तिः ॥६०॥
उत्सवं श्रमरुचापि दृशीना-
मुन्नयन् खुररजश्छुरित स्रक् ।
दित्सयेति सुहृदाशिष एष-
देवकी जठरभूरुरुराजः ॥६१॥
मधुपकितवबन्धो मास्पृशाङ्घ्रिं सपत्न्याः,
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।

मन्देति स्पष्टम् ॥ १०।३५।२१ (५८)

वत्सलेति । यत् यदा एष सुहृदाशिषो दित्सया एति तदा खुर-रजसाच्छुरित स्रग् भवति । अगोर्गोवर्द्धनः । उपोह्य निर्व्वर्त्त्य ॥ १०।३५।२२ (६०)

उत्सवेति । श्रमरुचा श्रमशोभयाऽपि दृशीनां उत्सवं उन्नयन् प्रापयन् । उडुराजश्चन्द्रमाः । प्रथम आदययोरुः । द्वितीय आदययो-दकारः । अन्तयोर्दः । मदविघूर्णितेति श्लोकद्वयं बलभद्रविषय-त्वाद् अत्र नोक्तम् । गोप्यो मिथः ॥ १०।३५।२३ (६१)

एवमल्पव्यवधानं प्रवासमुक्त्वा बहुव्यवधानमाह । मधुपकितवेति ।

वहतु मधुपतिस्तन्मानिनीनां प्रसादम्,
यदुसदसि विडम्बां यस्य दूतत्वमीदृक् ॥६२॥
सकृदधरसुधां स्वां मोहिनीं पाययित्वा,
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथन्तत् पादपद्मं नु पद्मा,
अपिवत हृतचेता ह्युत्तमः श्लोकजल्पैः ॥६३॥

हे मधुप ! कितववन्धो धूर्त्तसम्बन्धिन् नः अङ्घ्रि सपत्नाः कुचयोर्विलुलितं संयोगविमर्दात् प्रभ्रष्टम् मालाया यत् कुङ्कुमम् । तद्रूक्षैः श्मश्रुभिर्मार्ष्टु । रति व्यतिकरे सपत्नीस्तनकुङ्कुमरञ्जितायां उपवेशाद् भ्रमरस्य श्मश्रुतां सम्भाव्येदमुच्यते । मधुपेति । (कृष्णः) तस्य मानिनीनां माथुरीणाम् । तन्मानिनीनामिति सोत्रासं (सोत्साहम्) विडम्बां उपालम्भनीयम् । स्त्रैणत्व प्रकाशनाद् ईदृक् कुचकुङ्कुमेन श्लाघ्यमानत्वाद् निर्लज्जास्यदत्वेन मधुपतिरप्येवंविध इत्युक्तम् । अतएव मधुपत्वं तस्य च कितवत्वम् । प्रायेण हि मधुपाः कितवाश्च निर्झीका भवन्ति ॥ १०।४७।१२ (६२)

कितव त्वं बन्धुत्वं चाह । सकृदित्यादि । सुमनसोऽस्मान् भवानिव चलप्रकृतिर्दृश्यत इति । भवादृक् श्रीकृष्णः । यथा त्वं सुमनसः पुष्पान्युपभुज्य त्यजसि । तस्य कृष्णसौहृदस्य पादपद्मं, पद्मालक्ष्मीः कथं परिचरति । नु शब्दो वितर्के अपि अहो । हृतं बद्धितं चित्तं यस्याः । उत्तमःश्लोकस्य जल्पैः विविधैः चाटुकारैः प्रियवाक्यैः भ्रमितचित्ता परिचरतीत्यर्थः । वत इत्यनुकम्पायाम् ॥ १०।४७।१३ (६३)

किमिह बहुषडङ्घ्रे गायसि त्वं यदूनां-
मधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां गीयतां तत्प्रसङ्गः,
क्षपित कुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥६४॥
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः,
कपटरुचिरहास भ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्वयं का ?
अपिच कृपणपक्षेह्युत्तमः श्लोकशब्दः ॥६५॥

भ्रमरगुञ्जितं कृष्णगुणगानं मत्वाह । किमिहेति । हे षड्घ्रे ! भ्रमरयदूनामधिपतिमिति लक्षणया तच्चरितमभिमतम् । तत् किं बहुगायसि । यतस्तत्पुराणं जीर्णं वयञ्चाग्रहाः एकाकिन्यः । विजयोर्जुनः । तस्य सखा कृष्णः । तस्य सख्यो मथुरा स्त्रियः । तासामग्रतो गीयताम् ताश्च तवेष्टं कल्पयन्ति । पूरयिष्यन्ति इत्यर्थः । वर्त्तमानसामीप्ये (वर्त्तमानवद् वा) भविष्यदर्थे लट् । यत स्ताः क्षपितकुचरुजः इष्टाश्च तस्य न तु वयमित्यर्थः ॥ १०।४७।१४ (६४)

भो मातः मैवं वोचः त्वामप्यभिप्रेत्याह । त्वामनुस्मृत्यानङ्ग-विकलः त्वां प्रसादयितुमादिष्टवानिति । अत आह दिवीति । मामाह्वातुमयमागत इत्यभिप्रेत्याह । स्वर्गादौ तस्य दुरापायाः स्त्रियः ताः काः न काश्चनापीत्यर्थः । अतः किं मदाह्वानेन । कपटेन रुचिरो हासो भ्रूभ्यञ्च यस्याः । यस्य चरणरजो लक्ष्मीरप्युपास्ते तस्य वयं काः न काश्चनापीत्यर्थः । अपि चैवंविधस्यापि अस्मासु कृपया युज्यते । यतः उत्तमःश्लोकशब्दः कृपणानां पक्षे सहायभूते

विसृज शिरसि पादं वेद्म्यहं चाटुकारैः,
अनुनयविदुषस्तेऽभ्येत्यदौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्य पत्यन्यलोकान्,
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ॥६६॥

मृगयुरिवकपीन्द्रं विव्यधे लुब्धधर्म्मा,
स्त्रियमकृतविरूपाम् स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्वा वेष्टयद् ध्वाङ्क्षवद्य-
स्तदलमसित सख्यै र्दुस्त्यजस्तत्कथार्थः ॥६७॥

पुंसि वर्त्तते। स च उत्तमःश्लोकत्वादनाथानप्यस्माननुग्रहिष्यतीति भावः॥ १०।४७।१५ (६५)

भ्रमरं (गं) स्वचरणपतितं मत्वाह। विसृजेति। अनुनय विदुषः सन्धानप्रकारज्ञानं मुकुन्दागतेन त्वया चाटुकारैः प्रियवाक्योद्गारैः। शिरसि कृतम् मे पादं विसृज वेद्म्यहं मुकुन्दं। नु अहो अस्मिन् मुकुन्दे किं सन्धेयम्? यः अस्मान् व्यसृजत्। स्वकृते कृष्णार्थं विसृष्टास्त्यक्ताः। अन्ये गृहादयः। अकृतमकृतज्ञंचेतो यस्य॥ १०।४७।१६ (६६)

अकृतचेतस्त्वमेवाह। मृगयुरिवेति। मृगयुर्व्याधः। कपीन्द्रो वाली। लुब्धस्वभावः स्त्रियं सूर्पणखाम्। अकृत कृतवान्। कामयानां कामयमानाम्। बलिं वैरोचनम्। बलिमुपहारं प्रतिग्रहरूपम्। मत्वा भक्षयित्वा। अवेष्टयद् बबन्ध। ध्वाङ्क्षवत् काकवत्। सत् तस्मादकृतज्ञत्वात्। असितः श्रीकृष्णः॥ १०।४७।१७ (६७)

यदनुचरितलीला कर्णपीयूष विप्रुट्,
सकृददनविधूत द्वन्द्वधर्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्यदीना-
बहव इह विहङ्गा भिक्षुचर्यां चरन्ति ॥६८॥
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः,
कुलिकरुतमिवाज्ञाःकृष्णवध्वो हरिण्यः ।
दृदृशुरसकृदेतत् तन्नख स्पर्शतीव्र-
स्मरुज उपमन्त्रिन् भण्यतामन्य वार्त्ताः ॥६९॥

नन्वलं चेत् किमिति प्रस्तूयते तत्राह दुस्त्यज इति । दुस्त्यजत्व-मेवाह । यदनुचरितेति । यस्य अनु अनुकूला चरित लीलैव कर्ण-पीयूषं तस्य विप्रुषो विन्दवः तेषां सकृददनेन विधूतास्त्यक्ता द्वन्द्वधर्माः स्त्रीपुरुषाणामाचाराः रागद्वेषादयो वा यैस्ते तथा । विभ्यः पत्निभ्यः नष्टाः पृथग् भूताः त्यक्तसङ्गा इत्यर्थः । सपदि लीला कर्ण-नान्तरम् । गृहं कुटुम्बञ्चेह वृन्दावने भिक्षुचर्यां परमहंस-स्थितिम् ॥ १०।४७।१८ (६८)

ननु पूर्व्ववृत्तान्तो यथा तथाऽस्तु एतत् सन्धानं न घटतीति चेत्त-त्राह वयमिति । वयं सर्वा अपि जिह्मस्य कुटिलस्य कृष्णस्य व्याहृतमुक्तम् ॥ ऋतमिव असत्यमपि सत्यं मन्यमानाः दृदृशुरित्ये तस्य विपरिणामाद्दृशिम । एतत्तस्य विप्रलम्भकत्वम् । यथा कुलि-कस्य व्याधस्य कृतं कपटगीतं हरिणो वास्तवं मन्यमाना बधेनासत्यं दृदृशुः । कृष्णोहरिर्मृगश्च । हे उपमन्त्रिन् प्रलोभक ! तस्मादन्य-वार्त्ताक्रियताम् ॥ १०।४७।१९ (६९)

प्रियसख ! पुनरागा प्रेयसा प्रेषितः किम्,
वरय किमनुरुन्धे माननीयोसि मेऽङ्ग ।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वम्,
सतत मुरसि सोम्य श्रीर्वधूः साकमास्ते ॥७०॥
अपि वत मधुपूर्य्या मार्य्यपुत्रोऽधुनास्ते,
स्मरति स पितृगेहान् सौम्यबन्धूंश्च गोपान् ।
क्वचिदपि स्वकथा नः किङ्करीणां गृणीते,
भुजमगुरु सुगन्धं मूर्ध्न्यधास्यत् कदानु ॥७१

किञ्चिद् भ्रमणं कृत्वा आवृत्तं भ्रमरं भगवत् प्रेषितं मत्वाह प्रियसखेति । हे प्रियसख ! प्रेयसाकृष्णेन प्रेषितः सन् किं पुनः रागाः आगतोऽसि । किमनुरुन्धे कं अनुवृत्तिं करोमि किन्ते कामं पूरयामीत्यर्थाः । मथुरागमनमेव चरयामीतिचेत् तत्राह । नयसीति । इह अस्मिन् प्रस्तावे दुस्त्यजं द्वन्द्वं माथुरीभिः सह मिथुनीभावो येन तस्य पार्श्वं तदासक्तत्वेनास्माभिः सह तस्य प्रसङ्गाभावाद् व्यर्थं गमनमिति भावः । न कदाचिदेकान्ते त्वयाऽपि सह प्रसङ्गो भविष्यतीति चेत्तत्राह । सततमिति । हे सोम्य ! सोमवत्प्रियदर्शन ! सा प्रसिद्धा कं सुखं यथा स्यात् तथा ऽऽस्ते ॥ १०।४७।२० (७०)

मनोगतं पृच्छति अपीति । वत अहो । मधुपुरी मथुरा । आर्य्यस्य वसुदेवस्य पुत्रः सः क्वचिदपि कस्मिन्नपि प्रसङ्गे कथाः वार्त्ता गृणीते करोतीत्यर्थः । अपीति निपातः सम्बोधने । धास्यत् धास्यति । नु शब्दः प्रश्ने । गोप्यो भ्रमरम् ॥ १०।४७।२१ (७१)

पद्ममहिष्यः—

कुररि विलसि त्वं वीतनिद्रानशेषे,
स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ।
वयमिव सखि कश्चिद् गाढ़ निर्विद्धचेता,
नलिननयनहासोदारलीलेक्षितेन ॥७२॥
नेत्रे निमीलयसि नक्तमदृष्टबन्धु,
स्त्वं रोरवीषि करुणं वत चक्रवाकि ।
दाक्षिण्यतावयमिवाच्युत पादजुष्टम्,
किम्बा स्रजं स्पृहयसे कबरेण वोढ़ुम् ॥७३॥

अथ वैचित्ये विप्रलम्भमाह । पद्ममहिष्य इति । कुररीति । हे कुररि नशेषे । जगति स्वपति शयानेऽपि त्वं वीतनिद्रा यत्तत् किमीश्वरस्त्वत् स्वामी कुररः सुप्तबोधः अदृशीभूतः । वयमिव यथा वयं सुप्तेश्वरत्वाद्वीतनिद्राः । अनेन निद्राच्छेदलक्षणा स्मरदशा उक्ता (१) । नह्यिशेषणमीश्वरस्य सकिंचित्तेऽपि उत्साहमाहात्म्याद् गुप्तत्वोक्तिः । न ह्यत्र भगवतोऽन्तर्यामादिकमुक्तम् । नशेष इत्यत्र न च्युतोऽच्युत इति वद् "विभाषा न लोपो नञः" (२) । क्वचित् शब्दो हि दृष्टसंप्रश्ने । नलिननयनः कृष्णः । निर्विद्धचित्तत्वं वीतनिद्रत्वे कारणान्तरम् ॥ १०।८०।१५ (७२)

नेत्र इति । नक्तं रात्रौ बन्धुः प्रियतमः । रोरवीषि भृशं शब्दं

---

(१) विप्रलम्भपर्य्याये उज्ज्वलनीलमणौ ।

(२) पाणिनिः ६।३।७३ सूत्रम् ।

भो भोः सदा निष्टनसे उदन्व-
न्नलब्धनिद्रोधिगतप्रजागरः।
किम्बा मुकुन्दापहृतात्मलाञ्छनः,
प्राप्तां दशां त्वञ्च गतो दुरत्ययाम् ॥७४॥
त्वं यक्ष्मणा बलवतासि गृहीत इन्दो-
क्षीणस्तमो न निजदिधीतिभिः क्षिणोषि।
कच्चिन्मुकुन्द गदितानि यथा वयं त्वम्,
विस्मृत्य भोः स्मगितगीरुपलक्ष्यसे नः ॥७५॥
किम्वाचरितमस्माभिर्मलयानिल तेऽप्रियम्।
गोविन्दापाङ्गनिर्भिन्ने हृदीरयसि नः स्मरम् ॥७६॥

करोषि। वतेति खेदे। अच्युतस्य पादाभ्यां भक्त्यर्पितत्वाज्जुष्टां वयमिव यथावयं स्पृहयामः। अनेन सङ्कल्पलक्षणा ॥ १०।९०।१६(७३)

भो इति हे उदन्वन् समुद्र निष्टनसे नितरां शब्दायसे। मुकुन्देनापहृतं आकृष्टं यदात्मनो लाञ्छनं समुद्रशयना (शायिनी) मूर्त्तिः तेन प्राप्तां दशामङ्गतः। त्वञ्चेति चकारेण वयञ्च। समुद्रशायिन एव पुरुषस्य कृष्णत्वात् प्रतिबिम्बितं हरिः गीत इति कविसमयाच्च। अत्र निष्टनस इत्यनेन प्रलापलक्षणा ॥ १०।९०।१७ (७४)

त्वमिति। यक्ष्मणा दक्षशापजेन रोगेण प्रक्षिणोषि। न नाशयसि। यथा वयं विरहजेन यक्ष्मणा क्षीणाः। तमोऽज्ञानम् दीधितिभिः प्रज्ञारश्मिभिर्नक्षिणुषे। विस्मृत्य विशेषात् स्मृ स्मगितगीर्निश्चलः। उपलक्ष्यसे दृश्यसे नोऽस्माभिः। अनेन व्याधिलक्षणा ॥ १०।९०।१८ (७५)

मेघश्रीमंस्त्वमसि दयितो याद्वेन्द्रस्य नूनम्,
श्रीवत्साङ्कं वयमिव भवान् ध्यायति प्रेमबद्धः ।
अत्युत्कण्ठः शबलहृदयोऽस्मद्विधो वास्मधाराः,
स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तत् प्रसङ्गः ॥७७॥

प्रियरावपदानि भाषसे,
मृतसञ्जीविकयानया गिरा ।
करवाणि किमद्यते प्रिय-
म्बद मे वल्गितकण्ठ कोकिल ! ॥७८॥

न चलसि नवदस्युदारबुद्धे,
क्षितिधरचिन्तयसे महान्तमर्थम् ।
अपिवत वसुदेव नन्दनाङ्घ्रिम्,
वयमिव कामयसे स्तनैर्विधर्त्तुम् ॥७९॥

शुष्यद्बृदाः कृशतया (कर्शिता) वत सिन्धुपत्न्याः,
सम्प्रत्यपास्त कमल श्रिय दृष्ट भर्त्तः ।

किम्बेति । किमप्रियमाचरितं नो हृदि ईरयसि उद्दीपयसि । अनेन मनःसङ्गलक्षणा ॥ १०।८०।१८ (७६)

मेघेति । शबलं व्याकुलम् । अत्र स्मृतिः ॥ १०।८०।२० (७७)

प्रियेति । प्रियस्य नाम पदानीति । (भाषसे) अनया पञ्चमस्वर-युक्तया वल्गितो वल्गीकृतः । अत्र गुणकीर्त्तनम् ॥ १०।८०।२१ (७८)

नेति । अपि अहो । यथावयं स्तनैर्विधर्त्तुं कामयामहे । अत्र त्रपानाशः ॥ १०।८०।२२ (७९)

यद्वद्वयं मधुपतेः प्रणयावलोक-
मप्राप्यमुष्टहृदयाः पुरुकर्शिताः स्मः ॥८०॥
हंसस्वागतमास्यतां पिबपयो ब्रूह्यङ्ग शौरेः कथाम्,
दूतं त्वानु विदाम कश्चिदजितः स्वस्त्यस्ति उक्तं पुरा।
किम्वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयम्,
क्षौद्रालापयकामदं श्रियमृते सैवैकनिष्ठा स्त्रियाम् ॥८१

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
विप्रलम्भशृङ्गारो नाम द्वादशोध्यायः।

हे सिन्धुपत्नयो महानद्यः! आः क्लेशम्। यूयं सूर्षस्था भवथः। शुष्यन्त्यो (पुष्यन्त्यो) हृदाः हृदयस्थानीयाः प्रदेशा यासां ताः। अपेताः कमलश्रियो मुखायमानपद्मशोभा यासां ता स्तथा। वयमप्येवंविधाः। अत्र तनुता ॥ १०।८०।२३ (८०)

हंसेति। हे हंस आस्यतां उपविश्यताम्। शौरेः कृष्णस्य। नु अहो! अजितः कृष्णः। पुरा पूर्व्वमस्मान् प्रति यदुक्तं तत् किं स्मरति? तच्च कस्माद्भजामो वयम्। यतोऽसौ क्षौद्रवद् मधुवन्मधुरालापो न तु कामदः। श्रियमृते सा हि यासां स्त्रीणां मध्ये-एकनिष्ठा एकस्मिन्नेव स्थिरीभूता न तु चञ्चलेति सोल्लासोक्तिः। अयमर्थः अचञ्चला अप्यस्मान् उज्झि (हि) त्वा चञ्चलां श्रियं स भजते इति। अचोन्नादः। महिष्यःकुरर्य्यादीन् ॥ १०।८०।२४ (८१)

अत्र च स्मृति गुणकीर्त्तन-व्याधि-प्रलापास्त्रस्रो दशाः काव्यप्रकाशनिष्ठाः। निद्राच्छेदादयस्तु षट् नयनप्रीतिरित्यत्र रति

रहस्यस्था (१) दर्शिता इति ज्ञेयम्। तासां नानामहिषीगतत्वादु यत् क्रमादुक्ताः। मतिलक्षणात्वन्यास्मरदशास्ति (२) "सा च इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे। ध्रियमाणेन माधव्यो लेभिरे वैष्णवीं गतिम्" ॥ (३) इत्यतेन मूलग्रन्थेन सूचिताऽप्यमङ्गलत्वादिह नोक्ताः। एकादशश्लोके जलकेलिप्रसङ्गे मूले दर्शिता (४)। तत्र च सन्निहितेऽपि भगवति तदालाप सौष्ठवेन तासां वैचित्र्याविर्भावान्नास्य भेदस्य पूर्व्वानुरागादिष्वन्तर्भावः शक्यो वक्तुम्। तथाच तत्रोक्तं "(५) कृष्णस्यैवंविहरतो गत्वालापेक्षितस्मितैः। नर्म्मस्वेलि परिष्वङ्गैः स्त्रीणां किल हृताधियः ॥ ऊचुर्मुकुन्दैकधियो गिर उन्मत्तवज्जडं। चिन्तयन्त्योऽरविन्दाक्षं यास्तामेगदतः शृणु" इति। न चास्मिन्नध्याये भगवतो व्यवधानादिकमुक्तम्। तस्माद्वैचित्र्यरूपं विप्रलम्भस्य भेदान्तरमवश्यमभ्युपेतव्यम्। अयमेवात्र विदग्धवृद्धेराचार्य्यस्याभिप्रायः।

इति हैमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां विप्रलम्भशृङ्गारो नाम द्वादशोध्यायः (१२)।

---

(१) कक्षीक प्रणीतरतिशास्त्रम्। तच्च वेण्यदत्तार्थं लिखितम्। तत्र रतिविषयेऽनेके विषयाः सन्ति।

(२) "चिन्तात्र जागरोद्वेगौ तानवं मलिनाङ्गता, प्रलापो व्याधिरुन्मादो मोहोमृत्युर्दशादश" इत्युज्ज्वलनीलमणौ प्रवासाख्य विप्रलम्भे धृतोऽयं श्लोकः।

(३) श्रीमद्भागवतम् १० ९०।२५

(४) " १०।९०।११।

(५) " १०।९०।१३-१४

अथ चयोदशोऽध्यायः ।

विष्णुभक्तानां करुणरसः ।

तत्राऽर्ज्जुनः—

यत् संश्रयाद् द्रुपदगेहमुपागतानाम्,
राज्ञां स्वयम्बरमुखेस्मरदुर्म्मदानाम् ।
तेजो हृतं खलु मया निहतश्च मत्स्यः ;
संज्ञोक्तेन धनुषाधिगता च कृष्णा ॥१॥

यत् सन्निधावहमुखाण्डवमग्नयेऽदा-
मिन्द्रञ्च सामरगणं तरसा विजित्य ।
लब्धा सभा मयकृताद्भुतशिल्पमाया-
दिग्भ्यो हरन्नृपतयो बलिमध्वरे ते ॥२॥

एवमष्टभेदं शृङ्गारमुक्त्वा क्रमप्राप्तं करुणमाह । करुणेति । सचेष्टनाशानिष्टसम्प्रयोगविभावो दैवोपालम्भनिश्वास-तानवमुख-शोषणस्वरभेदाश्रुपात-वैवर्ण्य प्रलय-संस्तम्भ-कम्पभूलुण्ठनगात्र-स्रंसना (स्तम्भा) साक्रन्दनाद्यनुभावो निर्व्वेदग्लानिचित्तौत्सुक्य-मोहश्रम-त्रास-विषाद-दैन्य-व्याधि-जड़तोन्मादापस्मारालस्यमरणप्रभृतिदुःखस-मयदुःखमयव्यभिचारीति । तत्रेष्ट नाशविभावे करुणरसे अर्ज्जुनो-द्भवौ भक्तौ । तत्र प्रथममर्ज्जुनमाह । तत्र द्रौपदीस्वयम्बरे । कृष्णोप-कारं स्मरत्यर्ज्जुनः । यत् संश्रयादिति । कृष्णा द्रौपदी ॥ १।१५। ७ (१)

खाण्डवदहने । राजसूये च कृष्णोपकारं स्मरति । यत् सन्नि-

पत्न्यास्त्वधिमखक्रमहाभिषेक-
श्लाघिष्ठ चारुकवरं कितवैः सभायाम् ।
स्रष्टं विकीर्य्य पदयोः पतिताश्रुमुख्या-
यस्तत् स्त्रियो ह्यतहृतेश विमुक्तकेशाः ॥३॥
योनो जुगोपवनमेत्यदुरन्तकृच्छ्राद्-
दुर्व्वाससोऽरिरचिताद्युताग्रभुग् यः ।
शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीम्,
तृप्तममंस्त सलिले विनिमग्न सङ्घः ॥४॥

धाविति । उ अहो युधिष्ठिरः अहं अदां दत्तवान् । मयेन कृता (१) अद्भुता शिल्पमाया यस्यां सभायाम् ॥ १।१५।८ (२)

पत्न्या इति । अधिमखम् राजसूयमधिकृत्य क्रमो रचितो यो महाभिषेकः तेन आश्लिष्टं श्लाघ्यवत्तम् यत् चारुकवरं केशपाशः । कितवैर्द्यूतशासनादिभिः विकीर्य्यौन्मुच्यस्रष्टं पतिताश्रुमुखं यस्याः । तथा पतितं पादयोः । सापेक्षत्वेऽपि समासः । तदानीमेव स्मरणात् पुरस्थितस्य कृष्णस्य पदयोः । तत् स्त्रियः तेषां कितवानां स्त्रियः । अकृत कृतवान् । हृतैरीशैर्हेतुभूतैर्विमुक्तकेशाः ॥ १।१५।१० (३)

दुर्व्वाससः शापे कृष्णोपकारं स्मरति । योनो जुगोपेति । वनवासस्थावत् कृच्छ्रं तत्रापि दुर्वाससा दुरन्तं कृच्छ्रं । सचारिणा दुर्य्योधनेन रचितः । वनवासस्थान् पाण्डवान् युधिष्ठिरद्रौपदीभोजनानन्तरं याचस्वेति प्रार्थितः यावद्द्रौपदी न भुङ्क्ते । तावदक्षयमन्नमितिहि सूर्य्येण वरो दत्तः । यो दुर्व्वासा अयुताग्रभुक्शिष्याणा-

---

(१) शिल्पशास्त्रप्रणेत्रा मयेन रचिता ।

यत्तेजसाऽथ भगवान् युधि शूलपाणि-
र्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ।
अन्येऽपिचाह्म ममुनैव कलेवरेण,
प्राप्तो महेन्द्रभवने महदासनार्द्धम् ॥५॥
तत्रैवमे विहरतो भुजदण्डयुग्मम्,
गाण्डीवलक्ष्मरातिवधाय देवाः ।
सेन्द्राःश्रिता यदनुभावितमाजमीढ़-
तेनाह मद्यमुषितः पुरुषेण भूम्ना ॥६॥

मयुतस्याग्रे भुङ्क्ते । किं कृत्वा कृष्णो जुगोप । शाकान्नशिष्टमुपभुज्य तदानीमेव द्रौपदीस्मरणादागत्य शाकरूपस्यान्नस्य यत्शिष्टं पात्रे लग्नं तत् स्वयम्भुक्त्वा यतो भोजनाद् दुर्व्वासाः त्रिलोकीतृप्तामभंस्त । न केवलमात्मानं 'सशिष्यं तु सलिले स्नात्वा भोक्तुमागच्छतेति युधिष्ठिरवचनाद् यत्र (दा) स्नातुं गतः तत्र कौटश्यः विनिमग्नः शिष्यसहितः आत्मा यस्य स तथा ॥ १।१५।११ (४)

दिव्यास्त्रलाभे कृष्णोपकारं स्मरति श्लोकद्वयेन । यत्तेजसेति । अन्येपि लोकपाला निजान्यस्त्राण्यदुः । अहञ्च महेन्द्रस्यासनार्द्धं प्राप्तः ॥ १।१५।१२ (५)

तत्रेति । तत्रैव स्वर्गे । अरातयो निवातकवचनामानो दैत्याः । यदनुभावितं येन कृष्णेन प्रभाववत्कृतम् । भुजदण्डयुग्मं श्रित जग्मुः शरणं जग्मुः । हे आजमीढ ! युधिष्ठिर । तेनेत्यादि सद्वाक्यशेषः । भुम्ना अपरिच्छिन्नेन वाप्यभिव्यञ्जकं विना न दृश्यत इति मुषितत्वम् । अस्मदादिदेहानां त्वनुमापकत्वम् । न तु कृष्णतदेहव प्रत्यक्षत्वापादकत्वम् ॥ १।१५।१३ (६)

यद्बान्धवः कुरुकुलाब्धिमनन्तपार-
मेकोरथेन ततरेह मतीर्य्य सत्त्वम् ।
प्रत्याहृतं पुरुधनञ्च मया परेषाम्,
तेजस्पदं मणिमयञ्च हृतं शिरोभ्यः ॥७॥
यो भीष्मकर्णगुरुशल्यचमूष्वदभ्र-
राजन्यवर्य्यरथमण्डलमण्डितासु ।
अग्रे चरो मम विभो रथयूथपाना-
मायूंमनांसि च दृशा सह ओज आर्च्छत् ॥८॥
यद्दोषु मां प्रणिहितं गुरुभीष्मकर्ण-
द्रोणि (नमृ) त्विगर्त्तशलसैन्धववाह्लीकाद्यैः ।
अस्त्राण्यमोघमहिमानि निरूपितानि,
नोपस्पृशुर्नृहरिदासमिवासुराणि ॥९॥

गोग्रहणे कृष्णोपकारं स्मरति। यद्बान्धव इति। यद्बान्धवः कृष्णसहायः। अनन्तगाम्भीर्य्यस्यावधिः पारो विस्तारस्य यस्य तम्। ततरे तीर्णवान्। अनार्य्यसत्त्वं हिंस्रगजादिकम्। पुरुबहुधनम्। परैराहृतं गोधनं (परेषां) च मणिमयं मुकुटादि धनञ्च हृतम्। तद्धि-तेजःपदं तद्धरणे तेजो हरणात्॥ १।१५।१४ (७)

कुरुक्षेत्र युद्धे कृष्णोपकारं स्मरति,यो भीष्मेति श्लोकत्रयेण। दृशा दर्शनेन। आर्च्छदाकृष्टवान्। आयुर्मनांसि सह ओजश्च सह। कर्मेन्द्रियाणां बलमोजः। बुद्धीन्द्रियाणां शक्तिः मनांसि त्रीण्यन्तःकरणानि॥ १।१५।१५ (८)

यदिति यस्य कृष्णस्य। दोःषु भुजेषु। प्रणिहितं मां नो अस्त्रा-

सौत्ये हृतःकुमतिनात्मद ईश्वरो मे,
यत् पादपद्ममभवाय भजन्ति भव्याः।
मां श्रान्तवाह मरयो रहिनो सुविद्वम्,
नो प्राहरन् यदनुभावनिरस्त चित्ताः ॥१०॥
नर्म्माण्युदारुचिरस्मित शोभितानि,
हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति।
संजल्पितानि नरदेवहृदिस्पृशानि,
स्मर्त्तुर्लुठन्ति हृदयं मम माधवस्य ॥११॥
शय्यासनाटनविकत्थनभोजनादि-
ष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः।

ष्युपस्पृशः। निरूपितानि प्रेरितानि। अभोघमहिमा (तं) पूजनं (जितं) येषां तानि तथा। आसुराण्यस्त्राणि नृहरिदासं प्रह्लादं यथा न स्पृशन्ति स्म ॥ १।१५।१६ (९)

सौत्य इति। सौत्ये सारथित्वे मे मया कुमतिना हृतः। स ईश्वर आत्मानमीश्वरत्वं हृतो ददाति भजन्ति च भव्याः। अभवाय यस्य पादपद्मं यस्यानुभावेन निरस्तचिन्ता उन्मनीकृता अरयो न प्राहरन्। स सूतः कृतः। आत्मानं निन्दति ॥ १।१५।१७ (१०)

कृष्णेन सहवासं स्मरति श्लोकद्वयेन। नर्म्माणीति। नर्म्माणि परिहासवचांसि। हे पार्थ इत्यादि सम्बोधनपूर्व्वकं संजल्पितानि उदारवचांसि मम हृदयं लुठन्ति शोकेन इतस्ततः पातयन्ति ॥ १।१५।१८ (११)

यस्येति। विकत्थनं कलाकौशलदर्शनम्। ऐक्यादविनाभावात्।

सख्युः सखेव पितृवत् तनयस्य सर्व्वम्,
सेहे महान्महितया कुमते रघं मे ॥१२॥
सोऽहं नृपेन्द्ररहितः पुरुषोत्तमेन,
सख्या प्रियेन सुहृदा हृदयेन शून्यः ।
अध्वन्युरुक्रमपरिग्रहमङ्गरक्षन्,
गोपैरसद्भिरबलेव विनिर्ज्जितोऽस्मि ॥१३॥
तद्वै धनुस्त्वं दृषदः सरथोहयास्ते,
सोऽहं रथीनृपतयो यत आनमन्ति ।
सर्व्वं क्षणेन त्वदभूदसदीशरिक्तम्
भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम् ॥१४॥

हे वयस्य! ऋतवांस्त्वं सत्ययुक्तस्त्वमिति लक्षणा मूलाऽत्यन्ततिरस्कृता। विवक्षितवाच्येन ध्वनिना विप्रलम्भ उपहसितः कृष्णः मे अघं अपराधं सेहे। महान् महितया महत्वातिशयेन हि महत्त्वम् ॥ १।१५।१८ (१२)

कृष्णवियोगफलं कथयति। सोऽहमिति हृदयेन। सख्यमुपकारेण। प्रियत्वं निरुपधि प्रेमास्पदत्वेन। सुहृत्त्वं प्रत्युपकारानपेक्षम्। उपकर्त्तृत्वेनोरुक्रमपरिग्रहं कृष्णवल्लभा वर्गाः ॥ १।१५।२०(१३)

तदिति। यतो धनुरादेः असद् अप्रयोजकं। ईशेन रिक्तं हीनं यथा ऊष्यामूषरभूम्यामुप्तम्। कुहकेन कपटेन राद्धं प्राप्तम् (पक्वं) तदेव भस्मनिहुतं। एतद्यथात्यन्तमप्रयोजकमिदमित्यर्थः। अर्ज्जुनो युधिष्ठिरम् ॥ १।१५।२१ (१४)

उद्धवः।

यन्मर्त्यलीलौपयिकं स्व योग-
मायाबलं दर्शयता गृहीतम्।
विस्मापनं स्वस्य च सौभगर्द्धेः,
परं पदं भूषणभूषणाङ्गम् ॥१५॥
यद्धर्ममुनोर्व्वत राजसूये,
निरीक्ष्य हृक् स्वस्त्ययनं त्रिलोकः।
कार्त्स्न्येन चाद्येह गतं विधातु-
रर्वाक्सृतौ कौशलमित्यमन्यत ॥१६॥
यस्यानुरागप्लुतहासरास-
लीलावलोक प्रतिलब्धमानाः।

उद्धवः कृष्णस्य(स्य)रूपं स्मरति। यन्मर्त्येति। यस्य मर्त्यानां या लीला तस्यामौपयिकं योग्यं तच्च स्वयोगमायाबलम्। लोकः पश्यतिति गृहीतम्। मणिमन्त्रौषधीर्व्विना समाधिनैव याविर्भवति सा योगमाया। न केवलमन्यस्य स्वस्य च। विस्मापनं कथमिदमाविर्भूतमिति। यतः सौभाग्यं सम्पत्तेः परं स्थानम्। भूषणानामपि भूषणान्यङ्गानि यस्य स तथा ॥ ३।२।१२ (१५)

यदिति। यद्रूपं राजसूये निरीक्ष्य त्रिलोकोऽमन्यत। अद्य अर्घ्यदानावसरे। इह कृष्णरूपे यत् कार्त्स्न्यं तद्गुणसम्पूर्णत्वम्। तेन गतं ज्ञानं मया विधातुः कौशलमर्व्वाक् सृतौ कर्म्ममार्गे तत्कर्म्मभोगायतननिर्म्माणे। न ज्ञानमार्गेण। सालोक्यादिभोगायतननिर्म्माणेनेति ॥ ३।२।१२ (१६)

व्रजस्त्रियो दृग्भिरनुप्रवृत्ता-
धियोऽवतस्थुः किलकृत्यशेषाः ॥१७॥
स्वशान्तरूपेष्वितरैः स्वरूपै-
रभ्यर्द्यमानेष्वनुकम्पितात्मा ।
परावरेशो महदंशयुक्तो-
ह्यजोऽपि जातो भगवान् यथाग्निः ॥१८॥
मां खेदयत्येतदजस्य जन्म-
विडम्बनं यद्वसुदेवगेहे ।

यस्येति । यस्य कृष्णस्य । अनुरागप्लुतेन हासादिना प्रतिलब्धो-मानोयाभिस्तास्तथा । प्रतिशब्देन ताभिरपि तथा हास्याद्याचरित-मिति गम्यते न दृग्भिः सर्व्वत्र कृष्णदर्शनैः अनुप्रवृत्ता सर्वं परित्यज्य कृष्णमेवानुगता धीर्यासां तास्तथा । ताः कृति (तौ) कर्त्तव्ये । अशेषाः शेषरहिताः । अवतस्थुः कृतकृत्यावभूवुरित्यर्थः ॥ ३।२।१४ (१७)

स्वेति । यः कृष्णोऽजोऽपि जन्मायोग्योऽपि । परावरेशोऽपि जन्मना विना कार्य्यं कर्त्तुं समर्थोऽपि जातः महतो महत्तत्त्वस्यांशेन विशुद्धोज्जितसत्त्वेन मुक्तः । उपाधिना विना जन्मासम्भवात् । यथा अग्निर्महाभूतत्वेन सर्वत्र सन्नपि दाहसम्बन्धा त्तज् जायते । यद्यपि शान्तान्यशान्तानि च तस्य वरूपाणि । तथापि शान्तानामनुकम्पया जातः ॥ ३।२।१५ (१८)

मामिति । एतत्त्रयं विडम्बनं अनुचिताचरणं मां खेदयति । किन्तद्वसुदेवगेहे तज्जन्म यश्च व्रजे वासः । यश्च पुराद्यावात्सीत् ।

ब्रजे च वासोऽरिभयादिव स्वयम्,
पुराद् व्यवात्सीद्यदनन्तवीर्य्य: ॥१९॥
दुनोति चेत: स्मरतो ममैतत्,
यदाह पादावभिवन्द्य पित्रो:।
ताताऽम्बकंसादुरुशङ्कितानाम्,
प्रसीद तन्नोऽकृतनिष्कृतीनाम् ॥२०॥
को वा ऽमुष्याङ्घ्रिसरोजरेणुम्,
विस्मर्त्तुमीशीत पुमान् विजिघ्रन्।
यो विस्फुरद् भ्रूविटपेन भूमे-
र्भारं कृतान्तेन तिरस्कार: ॥२१॥
दृष्टा भवद्भिर्ननुराजसूये,
चैद्यस्य कृष्णं द्विषतोऽपि सिद्धि:।

मथुरातो द्वारकामगात्। त्रिष्वपरिभयादिवेति लोकोक्त्या च तात:। न चानन्तवीर्य्यस्यारिभयम्। नृसिंहवदरिवध:। कार्य्य इति मे मतिरित्यर्थ:॥ ३।२।१६ (१९)

दुनोतीति। एतच्च मम चेतो दुनोति। यद्यसुदेवं प्रति तातेत्याह। देवकीं प्रति अम्बेति। यच्च पादवन्दनं यच्च प्रसीदतां युवामस्माकमिति वचनं यतो वयं कंसादत्यन्तभीता:। अकृतनिष्कृता:। अनिष्पादितपुत्रकार्य्या:। युवयोर्बन्धमोचाकरणात्॥ ३।२।१७ (२०)

कोवेति। ईशीत शक्नुयात्। विजिघ्रन् गन्धवासितेन्द्रिय: सन् विस्फुरन् भ्रूर्विटपो यस्मिन् कृतान्ते स तथा। भ्रूभङ्गेन प्रेरित इत्यर्थ:॥ ३।२।१८ (२१)

यां योगिनः स्वं स्पृहयन्ति सम्यक्,
योगेन कस्तद्विरहं सहेत ॥२२॥
तथैव चान्ये नरलोकवीरा-
य आहवे कृष्णमुखारविन्दम् ।
नेत्रैः पिबन्तोः नयनाभिरामम्,
पार्थास्त्वपूताः पदमापुरस्य ॥२३॥
तत्तस्य कौङ्क्ष्यं मलमृतान्नो-
विग्लापयत्यङ्ग यदुग्रसेनम् ।
तिष्ठन् निषण्णं परमेष्ठिधिष्ण्ये
न्यबोधयद्देव निधारयेति ॥२४॥
स्वयंत्वसाम्यातिशय स्वराधीशः,
स्वाराज्यलक्ष्म्याप्त समस्तकामः ।

दृष्टेति । भवद्भिर्विदुरादिभिः । आहवे कुरुक्षेत्रे संग्रामे ॥ ३।२। १९ (२२)

तथेति । पार्थोऽर्जुनः । अस्य विष्णोः तथैवेति स्पष्टम् ॥ ३।२। २० (२३)

तदिति । कौङ्क्ष्यं नोऽस्मान् भृत्यान् अलमत्यर्थं विग्लापयति । यत् परमेष्ठिधिष्ण्ये राजासने निषण्णमासीनमुग्रसेनं तिष्ठन्नसौ-नोन्यबोधयत् । विज्ञप्तवान् । हे देव ! निधारय अवधारयेति ॥ ३।२।२२ (२४)

यतस्तेन सहातिशयः साम्यं वा कस्यापि नास्तीति स्वयमिति ।

बलिं हरद्भिश्चिरलोकपालैः,
किरीटकोटीड़ित पादपीठः ॥२५॥
अहो वकी यं स्तनकालकूटम्,
जिघांसयाऽपाययदप्यसाध्वी ।
लेभे गतिं धात्र्यचितां ततोऽन्यम्,
कं वा दयालुं शरणं व्रजेम ॥२६॥
मन्ये ऽसुरान् भागवतां स्त्रयधीशे,
संरम्भमार्गाभिनिविष्टचित्तान् ।
ये संयुगे ऽचक्षत तार्क्ष्य पुत्र-
मंसे सुनाभायुधमापतन्तम् ॥२७॥
सुनीतिः ।
नान्यं ततः पद्मपलाशलोचना-
दुःखच्छिदं ते मृगयामि कञ्चन ।

त्रयाणां पुरुषाणां अधीशः स्वाराज्य लक्ष्मया मायया ऽनभिभूतत्वेन चिरलोकाश्चिरकालावस्थायिनो ब्रह्मलोकादयः ॥ ३।२।२१ (२५)

अहो इति । वकी पूतना यं कृष्णम् । एवमसाध्वपि धात्र्युचितां गतिं लेभे । धात्री यशोदा । माता हि देवकी । अपकारेऽप्युपकारो दयालुत्वम् ॥ ३।२।२३ (२६)

मन्य इति । असुरान् भागवतान् मन्ये । संरम्भो बुद्धया हन्तुमुद्यमः । अचक्षत अपश्यत् । तार्क्ष्यपुत्रं गरुड़म् । कीदृशमंसे स्कन्धेसु वा आयुधमस्त्रमायुधो यस्य स तथा । षष्टीस्थानेयोगेति ज्ञापकादसंज्ञायामप्यलुक । उद्धवः विदुरम् ॥ ३।२।२४ (२७)

यो मृग्यतेऽस्तगृहीतपद्मया,
श्रियेतरैरङ्ग ! विमृग्यमानया ॥२८॥

प्रह्लादः ।

मतिर्न कृष्णे परतः स्वतो वा,
मिथोऽभिपद्येत गृहव्रतानाम् । ।
अदान्त गोभिर्विशतान्तमिस्रम्,
पुनः पुनश्चर्वितचर्वणानाम् ॥२९॥
न ते विदुः स्वार्थगतिं हि विष्णुम्,
दुराशया ये बहिरर्थमानिनः ।

अथानिष्टसंप्रयोगविभावं श्लोकमाह । नान्यमिति । तस्याहि सपत्नमातृपुत्रनिर्भर्त्सनेन शोक उद्भूतः । ते ध्रुवस्य । इतरैर्ब्रह्मादिभिः । अत्र भगवदन्यस्य दुःखच्छेत्तुरभाव उद्दीपकः । सुनीतिः ध्रुवम् ॥ ४।८।२३ (२८)

मतिरिति । परतो गुर्व्वादिभ्यः स्वत आत्मनो मिथः परस्परम् विचारादभिपद्येतोपपद्येत । गृहमेव व्रतं येषां ते तथा । गृहासक्त इत्यर्थः (अन्धकाररूपत्वाद्विषयस्य तद्भिन्नत्वम्) । अदान्तैर्गोभिरजितेन्द्रियैः गोवत् सर्वत्र चरणशीलत्वाद् गाव इन्द्रियाणि । तमिस्रविषयं तादर्थ्यात्ताच्छील्यम् । चर्व्वितस्य तु भुक्तस्य चर्व्वणं पुनर्भोजनम् येषां ते तथा । अत्र हि प्रह्लादस्य विषयेषु क्लिश्यतः प्राणिनः समीक्ष्य मृदुमनस्कतया शोक उत्पन्नः स्थायी । स चर्वित चर्वणादिभिर्विभावैर्वर्द्धितः । एवं वक्ष्यमाणेषु रुद्रादिषु ॥ ७।५।३० (२९)

नेति । स्वार्थस्य भुक्तिमुक्तिरूपस्य गतिः प्राप्तिर्यस्माद्विष्णोः । बहिर्विष्णोरन्योऽर्थः प्रयोजनं येषां ते बहिरर्थाः । तान्मानयन्ति गुरुत्वे

अन्धा यथान्धैरुपनीयमानाः,
तेऽपीशतन्त्यामुरुधाम्नि बद्धाः ॥३०॥
नैषां मतिस्तावदुरुक्रमाङ्घ्रिम्,
स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोभिषेकम्,
निष्किञ्चनानां न वृणीत यावत् ॥३१॥
जह्यासुरं भावमिमं त्वमात्मनः,
समं मनोधत्स्व न सन्ति विद्विषः ।
ऋतेऽजितादात्मन उत्पथे स्थितात्,
तद्धि ह्यनन्तस्य महत्समर्हणम् ॥३२॥

नेति । ते तथा । गुरुसहिता अपि न विदुरित्यर्थः । अत्रदृष्टान्तः अन्धा इत्यादि । वाचि ईश्वरस्य वेदरूपायाम् । दामन्यामुरुणि नामान्येव दामानि यस्यां स तथा "तस्य वाक्तंतिर्नामानि दामातीति" श्रुतेः ॥ ७।५।७१ (३०)

नैषामिति । एषाविषयानुसारिणी त्यसंसारस्या (नर्थस्य संसारस्या)पगमो निर्हति (वृत्ति) र्यस्य विष्णुचरणस्पर्शस्यार्थः फलम् । प्रह्लादः पितरम् ॥ ७।५।३२ (३१)

जह्यौति । हे हिरण्यकशिपो ! समं मित्रामित्र विकल्पहीनम् । धत्स धारय । यतो ऽजितादु अनिगृहीतात् । आत्मनो मनसः । ऋते तव । विद्विषो न सन्ति । अजितत्वादुत्पथे उन्मार्गे स्थितत्वात् तत् समत्वधारणम् । अर्हणमाराधनम् ॥ ७।८।९ (३२)

दस्यून् पुरा षण्णविजित्यलुम्पतो-
मन्यन्त एकेऽजितादृशो दृशः ।
जितात्मनोऽज्ञस्य समस्य देहिनाम्,
साधोः स्वमोहप्रभवाः कुतःपरे ॥३३॥
शोचे ततो विमुखचेतस इन्द्रियार्थ-
मायासुखाय भरमुद्वहतो विमूढान् ।
प्रायेण देवमुनयः सुविविक्तकामाः,
मौनं चरन्ति विजने न परार्थनिष्ठाः ॥३४॥
नैवोद्विजे पर दुरत्यय वैतरण्या-
स्त्वद्वीर्य गायन महाऽमृतमग्नचित्ताः ।

अजितात्मतामेवाह । दस्यूनिति । दस्यून् शत्रून् । षट् काम क्रोध लोभ-मोह-दम्भ-ईर्षाख्यान् । लुम्पतः स्वसीमानमुल्लङ्घ्य विषय-भुञ्जानान् । एके त्वादृशाः । देहिनां देहाभिमानिनाम् । स्वमोह-प्रभवाः स्वरूपाज्ञानजाः । परे शत्रवः । ज्ञस्य देहाभिमानरहितस्य । कुतो भवेयुः । जितात्मत्वादिन्द्रियजयः । समत्वादात्मनो जयः । साधुत्वात्तन्निर्वाहः । प्रह्लादः पितरम् ॥ ७।८।१० (३३)

शोच इति । हे देव नृसिंह साऽहं शोचे ततस्त्वत्कथायाः इन्द्रिया-र्थमाया सुखाय विषयजनित सुखप्रतिरूपाय । भरं गृहधुरम् । तान् मुनय उद्धरिष्यन्तीति चेत् तत्राह । प्रायेणेति । अत्र शोच इति शोकस्य स्थायिनः कथनम् ॥ ७।९।४३ (३४)

नैवेति । एतान् विमुखचेतसः कृपणान् शोच्यान् न विमुमुचे न

नैतान् विहाय कृपणान् विमुमुक्ष एको-
नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥३५॥
यन्मैथुनादिगृहमेधि सुखं हि तुच्छम्,
कण्डूयनेन करयोरिव दुःखदुःखम्।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः,
कण्डूतिवन् मनसिजं विषहेत धीरः ॥३६॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्म-
व्याख्यारहो जपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ते ह्यजितेन्द्रियाणां
वार्त्ता भवन्त्युत नवाव तु दाम्भिकानाम् ॥३७॥

विमोक्तुमिच्छामि । अस्य जगतः विरक्तो भूत्वा पतिष्यत इति चेत्तत्राह ॥ ७।९।४४ (३५)

यदिति । यद्यस्मादिह मैथुनादौ गृहमेधिनि गृहसम्बन्धिनि गृहसंसर्गिणि । मेधतेः संसर्गार्थत्वात् तुच्छे सुखे कृपणा न तृप्यन्ति न विरज्यन्ते । दुःखादुःखं अत्यन्तदुःखरूपमित्यर्थः । अत्र दृष्टान्तमात्र । कण्डूयनेनेति । करयोः कण्डूयनेन यत् सुखं तदापातमात्ररम्यत्वेऽपि परिणतिविरसत्वाद् यथा दुःखं तथेत्यर्थः । ननु कुतः पुनरेषां कृपणत्वं तत्राह । कण्डूयतीति । धीरोहि मनसिजं कामं विषहेत । न चैते विषहन्ते । तस्मात्तथेत्यर्थः ॥ ७।९।४५ (३६)

नन्वतिरिक्तानामप्येषां साधनानुष्ठानान्मोक्षो भविष्यतीति चेत्तत्राह । मौनेति । हे पुरुषनृसिंह ! ते मौनादयोऽपवर्गाः । अपवर्गप्रयोजनभूता अपि परं केवलं दाम्भिकानां वार्त्ता जीवनोपाया

तत्तेऽर्हत्तम नमः स्तुतिकर्म्मपूजा
कर्म्मस्मृतिश्चरणयोः श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं
भक्तिं जनः परमहंसगतौ लभेत ॥३८॥

रुद्रः ।

देवदत्तमिदं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ सशौच्योच्चात्मवञ्चकः ॥३९॥
देवदेव जगन्नाथ गोविन्द पुरुषोत्तम ।
नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ! ॥४०॥
यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् ।
विपर्य्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥४१॥

भवन्ति, न तु अपवर्गाय । व्रतं एकादश्युपवासादि । श्रुतं शास्त्रम् । तपः कृच्छ्रादि । स्वधर्मो नित्यनैमित्तिकानुष्ठानम् । व्याख्यातदर्थविचारः । रहः एकान्तशीलनम् ॥ ७।९।४६ (३७)

मद्भक्त्याभविष्यन्तीति चेत्तत्राह । तत्त इति । हे अर्हत्तमनृसिंह ! ते त्वत्सम्बन्धिनम् नमो नमनम् । स्तुतिकर्म्मस्तुतिकरणम् । कर्म्मागृहमार्ज्जनादि । इति एवम् । षडङ्गया सेवया विना प्रह्लादः नृसिंहम् ॥ ७।९।५० (३८)

देवदत्तेति लोके मनुष्यदेहं देवदत्तं लब्ध्वा नात्मयत्नेन (नाद्रियेत) अजितेन्द्रियत्वात् अनादरः ॥ १०।६३।४१ (३९)

देवदेवेत्यादि सम्बोधनानि ॥ १०।६४।२७ (४०)

यस्त्वामिति । अशमयुक्तालोकचेष्टित-दर्शनादाक्रोशेन कृपातिशयं

चमसः।

य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम्।
न भजन्त्यवजानन्ति स्थानभ्रष्टाः पतन्त्यधः ॥४२॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः।
स्त्रियः शूद्रादयश्चैव तेऽनुकम्प्या भवादृशाम् ॥४३॥
विप्रो राजन्यवैश्यौ वा हरेः प्राप्ताः पदान्तिकम्।
श्रौतेन जन्मनाऽथापि मुह्यन्त्यामन्नाय वादिनः ॥४४॥
सर्वेषु शश्वत्तनुभृत्स्ववस्थितं
यथा स्वमात्मानमभीष्टमीश्वरम्।
वेदोपगीतं च न शृण्वतेऽबुधा
मनोरथानां प्रवदन्ति वार्त्तया ॥४५॥

श्वनयन्ति। ये सुखबुद्ध्या गृहीता दुःखस्वरूपा भवन्ति ते विपर्य्यया इन्द्रियार्था विषयाः। हे देवदेव! यस्त्वदर्थं त्वां विसृज्यते सोऽमृतं परित्यज्य विषमत्ति॥ रुद्रः श्रीकृष्णम्॥ १०।६३।४२ (४१)

य इति। एषां ब्राह्मणादीनां मध्ये पुरुषं विष्णुं। आत्मनः प्रभवं जनकम्। स्थानाद् ब्राह्मणादेः॥ ११।५।३ (४२)

दूरे हरित्यादिरलुक्। भवादृशां निमिप्रभृतीनाम्॥ ११।५।४ (४३

श्रौतंजन्मउपनयनम्॥ ११।५।५ (४४)

मुह्यन्तीत्युक्तं तमेवाह सर्वेष्विति। न शृण्वते च। शृण्वन्त्यपि नेत्यः।र्थं अभीष्टमिति। तस्य पुरुषार्थरूपत्वमुक्तम्। सर्वेष्विति। सौलभ्यम्। यथार्थमिति उपाधिदोषैरदूषितत्वम्। ईश्वरमिति

लोके व्यवायामिषमद्यसेवा
नित्यास्तु जन्तोर्नहि तत्र चोदना ।
व्यवस्थितिस्तेषु विवाहयज्ञ
सुराग्रहैरासु निवृत्तिरिष्टा ॥४६॥

निग्रहसामर्थ्ये (निग्रहः सामर्थ्यम्)। वेदेति प्रमाणसिद्धत्वम्। तत् किं शुभव्यापारानन्तरवैयग्र्यात्। एवंविधस्याप्यश्रवणम्। नेत्याह। मनोरथानामिति कर्म्मणि षष्ठी। कामिनां तदपि शोभेत यदि सम्पादयितुं शक्नुयुः। न तु तथेत्याह वार्त्तयेति। तत्किमोखरेनिरूढं दूषणमस्ति नेत्याह अबुधा इति ॥ ११।५।१० (४५)

एवं मोहमाहात्म्यात् स्त्रीसेवादयोऽपि "(१) ऋतौ भार्य्यामुपेयात्" इत्यादौ वेदेनैव विहिता इत्यपि मन्यमानान् बोधयितु माह। लोक इत्यादि। व्यवायो मैथुनम् आमिषं मांसम्। मद्यं प्रसिद्धम्। एषां सेवा नित्यारागतः प्राप्ता हि स्फुटम्। तत्र तासु सेवासु। चोदना वैदिकी प्रवर्त्तना (प्रेरणा) नास्ति। "अप्राप्ते शास्त्रमर्थवदिति" न्यायात्। नन्वेवं "ऋतौ भार्य्यामुपेया"दित्यादेः कोऽर्थ इति चेत्तत्राह। व्यवस्थितिर्नियम इष्टो वेदस्य। तथाहि यदि व्यवायः कार्य्यः (कर्त्तव्यः) तर्हि विवाहेनैव। यथामिषं भक्षणं तर्हि यज्ञेनैव। यदिमद्यं सेव्यं तर्हि "सुराग्रहेणैव। न तु निर्व्यवस्थित्या एव तत्राह (नेत्याह) आशिति। आशु शीघ्रम्। निवृत्तिर्यया व्यवस्थित्या सा तथा। अयमर्थः। वेदो हि व्यवायादीना मनर्थानुबन्धितां प्रावेद्य सर्वथा ततो निवृत्तिमिच्छन् स्वरसवाहिनी मनियतां तत्प्रवृत्तिं विवाहादिच्छलेन निरुणद्धि॥ किञ्च मकामाः

---

(१) आश्वसोपनिषत्।

धनञ्च धर्मैकफलं यतो मे
ज्ञानं स विज्ञानमनुप्रशान्तिः ।
गृहेषु युञ्जन्ति कलेवरस्य
मृत्युं न पश्यन्ति दुरन्तवीर्य्यम् ॥४७॥
यद्घ्राणभक्ते विहितः सुराया
स्तथा पशोरालभनं न हिंसा ।
एवं व्यवायः प्रजया नरत्यै
इमं विशुद्धं न विदुः स्वधर्म्मम् ॥४८॥

पुरुषाः रागोद्रेकात् काम्यानपित्यक्त्वा दृष्टोपभोगार्थमेव प्रवर्त्तन्त इत्याह ॥ ११।५।११ (४६)

धनञ्चेति । धर्म्म एकं केवलं फलम् यस्य स तथा । यतो धर्मात् सम्यगनुष्ठिताज् ज्ञानं शास्त्रे विवेचनाशक्तिर्विज्ञानं विविज्ञार्थं धारणाशक्तिः । अनुपश्चात् प्रशान्तिः । सकलकर्म्मक्षयात् कैवल्यावाप्तिः । एवं विधं परम्परया मोक्षफलम् धनं गृहेषु स्त्र्यादिषु युञ्जन्ति व्यर्थयन्ति । ननु दृष्टसुखत्यागेनादृष्ट सुखार्थितैव कुबुद्धिरिति चेत् तत्राह । कलेवरस्येति । स एष यज्ञादिव्याजेन मांसादिग्रहः सांख्यविद्भिः (सांख्यज्ञैः) शवलो धर्म्म इत्याख्यायते ॥ ११।५।१२ (४७)

यदिति । शुद्धं मत्वा यत्प्राणेति । प्राणेन नासिकासञ्चारिणा वायुनैव स्वादयन् विहितं न तु पानम् । तथाच (१) आश्वलायन-

---

(१) आश्वालयन कल्पसूत्रस्य तृतीयोऽध्यायो द्रष्टव्यः

हृदयस्याग्रे द्रक्ष्यति अथ जिह्वाया अग्र मक्षरः" । अग्रे संयक्षो "षट्शतानि नियुग्वत्ते

द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ।
मृतके स्वानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः ॥४९॥

महर्षिणा स्वसूत्रे तृतीयेऽध्याये "प्रा(घ्रा)णभक्ष्योऽत्रे"त्युक्तम् । तथापशोरग्निषोमीयादेरालभनं हिंसा न भवति । किन्तु नालभेत वत्समालभेति वदालभतेः स्पर्शार्थः । न चैवमवदानादिवचनविरोधः । पिष्टपशौ यज्ञे सर्वकल्पनायां सुकरत्वात् । अतएव महाभारते मोक्षधर्मेषु वेदविवादे ऋषिभिरुक्तम् । "अजैर्यष्टव्यमिति वैवदिकी श्रुतिः । अजसंज्ञानि बीजानि छागं न मन्तुमर्हत ॥ नैषधर्मः सतां देवो यत्रवै विद्यते पशुः । अतोऽन्यथा ब्रुवाणश्च पशुसंज्ञ एव राजा तैरेव सप्तः (शप्तः) । अत्रापि च "प्रेत्यखादन्ति ते च तान्" इत्यादिना भूयसा तत्र तत्र सा निषिद्धा । तस्मायमर्थः । सकामेषु क्रतुषु सर्वसादृश्यस्य सत्यपेक्षत्वात् यथाश्रुतएवार्थो ग्राह्यः । भगवत्प्रीत्यर्थेषुचादर्शितरीत्या तत्र वैगुण्येऽपि दोषाभावात् । यथोक्तम् "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यत" (१) इति । प्रजया हेतुभूतयारतिरूपानुषङ्गिकीतिर्विशुद्धं हिंसादिकलङ्करहितत्वात् ॥ किञ्च "(२) पशुना यजेत" आलभेत स्वामिघातस्य स्यात् इत्याह ॥ ११।५।१३ (४८)

द्विषन्त इति । मृतकं देहः । अनुबन्धः पुत्रादिः । गृहादिचतुर्णामोहा । तमसः निमिम् ॥ ११।५।१५ (४९)

पशूनां मध्यमेऽहनि । आश्रुतिः । अश्वमेधस्य वचनादूनानि पशुभि स्त्रिभिः ॥" गौडपादीय भाष्यम् । सांख्यकारिका १।४ ।

(१) श्रीमद्भगवद्गीता २।४० श्लोकः ।

(२) बृहदारण्यक १।२।७

हित्वात्यायासरचिताः गृहापत्यसुहृच्छ्रियः ।
तमोविशन्त्यनिच्छन्तो वासुदेव पराङ्मुखाः ॥५०॥

नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत्स आत्महा ॥५१॥

अदितिः ।

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रवः श्रवणमङ्गलनामधेयः ।

हित्वेति ॥ ११।५।१८ (५०) स्पष्टं

नृदेहमित्यादि । अत्र प्रार्थ्ये (प्ये) अध्याहारः । आद्यं नाना-योनि-प्रापक-कर्मोपार्ज्जकत्वात् । सुलभं अनादौ संसारे बहुशः प्राप्यमानत्वात् । दुर्ल्लभन्त्वस्थिरत्वात् । तस्येच्छया वा अप्राप्तत्वात् । प्लवमुडुपम् । सुकल्पं सुदृढम् । अस्य च वृत्तस्याच पाठे प्रयोजनं चिन्त्यम् । इदं हि भगवतो वाक्यं तस्य भजनीयत्वेन भक्तत्वाभावात् । भक्तिरसानुभवाद्धि भक्ताः । यथा गोप्यादयः । भक्तिरसश्च विष्णोस्तद्भक्तानां वा चरित श्रवणादिना जातश्चमत्कार इति प्रागुक्तम् । न चात्र भगवानेव भक्तिरसस्यानुभविता तस्माच्चिन्त्यः पाठः ॥ ११।२०।१७ (५१)

यज्ञेजति—तीर्थंगङ्गा पादेऽस्येति तीर्थपादः । श्रवः कीर्त्तिः । आपन्नानां शरणागतानां लोकानां यद् वृजिनं दुःखम् । तस्योपश-

आपन्नलोकवृजिनोपशमोदयाद्य
शं न कृधीश भगवन्नसि दीननाथः ॥५२॥

नारदः ।

स्वपादमूले पतितं त्वमर्भकं
विलोक्यदेव कृपया परिप्लुतः ।
उत्थाप्य तत् शीर्ष्णि दधात् कराम्बुजं
कालाहि वित्रस्तधियां कृताभयं ॥५३॥
स तत्करस्पर्शधूताखिलाशुभः
सपद्यभिव्यक्त परात्मदर्शनः ।

माय उदयः अवतारोऽस्येति । शं सुखम् । कृधि कुरुत । पुत्रसहितानां यतस्त्वं दीननाथोऽसि । अत्र क्लिश्यत पुत्रान् दृष्ट्वाऽदितेरुत्पन्नशोकः स्यात्तौ । अदितिः भगवन्तम् ॥ ८।१७।८ (५२)

स्वेति । तं प्रह्लादम् । देवो नृसिंहः । अत्र प्रह्लादविषये कृपात्मकस्य भगवच्चरणानुभवान्नारदस्य भक्तत्वम् । एवं करुणानुविद्धभक्तिरसं भावयन्तं पुरुषस्याप्तकामता लक्षणं फलं भवति इत्यभिप्रेत्याह ॥ ७।८।५ (५३)

स इति । स प्रह्लादः । तस्य नृसंहस्य । करस्पर्शेन धूतमपनीतम् अखिलं ससंस्कारं अशुभं माया पटलम् यस्य स तथा । सपदि तस्मिन्नेव क्षणे । अभिव्यक्तमाविर्भूतम् । परस्य अशनायतीतस्य । अपेतब्रह्मचत्रादिभावस्य । आत्मनः चेतनस्य । दर्शनं साक्षात्कारो यस्य स तथा । तस्य नृसिंहस्य पादपद्मम् ।

तत् पादपद्मं हृदिनिर्वृतो दधौ,
हृष्यत्तनुक्लिन्न हृदश्रु लोचनः ॥५४॥

इति श्रीबोपदेवविरचिते मुक्ताफले विष्णुभक्तानां
करुणरसो नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

निर्वृतः क्लिन्नसंश्रयत्वात् । निर्वृतत्वेन हृष्यत्तनुत्वादयः त्रयः सात्त्विकानुभावाः । क्लिन्नमार्द्रं भक्तिरसेन हृदयं यस्य स तथा । अश्रूणि लोचने यस्य तादात्म्यनिर्देशः आनन्दाश्रूणां प्रभूतत्वं क्षणमतिशयं द्योतयितुं व्यधिकरणबहुव्रीहिर्वा ॥ ७।२।६ (५४)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां करुणरसो
नाम त्रयोदशोऽध्यायः ॥१३॥

चतुर्दशोऽध्यायः ।

विष्णुभक्तानां रौद्ररसः ।

रौद्ररसे हिरण्यकशिपुः ।

व्यक्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमुर्षूणां हिमन्दात्मन् ननु स्युर्विक्लवा गिरः ॥१॥
यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि सखे कस्मात् स्तम्भे नदृश्यते ॥२॥
सोऽहं विकत्थमानस्य शिरःकायाङ्घ्रिरामिते ।
गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥३॥

अथ मात्सर्य्यदारापहारदेशजात्यभिजन-विद्याकर्म्मनिन्दा असत्य-वचनस्वभृत्याधिक्षेपोपहासवाक्पारुष्यद्रोहादिविभावं नयनराग-भ्रूकुटीकरणदन्तौष्ठपीड़न-गण्डस्फूरण-हस्ताग्रनिष्पेषतारणप्रहरणाहरणशस्त्रसम्पातरुधिरापकर्षणच्छेदनाद्यनुभावं शैघ्र्यमेवोत्साह विबोधामर्षचापलादिव्यभिचारिणं क्रोधस्थायिनं रौद्ररसमाह । रौद्रेति। तत्रापि हिरण्यकशिपौ शिशुपाले च मात्सर्य्यविभावः क्रोध इति दर्शयन् परितुष्टवाद्धिरण्यकशिपुगतं प्रथमं प्रस्तौति । व्यक्तमिति। व्यक्तं निश्चितं अतिमात्रं अतिशयिनम् (तम्) ॥ ७।८।११ (१)

य इति स्पष्टं ॥ ७।८।१२ (२)

एवन्दुरुक्तैर्मुहुरर्दयन्कृषा,
सुतं महाभागवतं महासुरः।
खड्गं प्रगृह्योत्पतितो वरासनात्,
स्तम्भं ततारातिबलः स्वमुष्टिना ॥४॥
सविक्रमन् पुच्छबधेश्च रोजसा,
निशम्य निर्ह्रादमपूर्वमद्भुतम्।
अन्तः सभायां ददृशे तत्पदम्,
वितत्रसुर्येन सुरारि यूथपाः ॥५॥
सत्यं विधातुं निजभृत्यभाषितम्,
व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः।
अदृश्यताद्भुतरूपमुद्वहन्,
स्तम्भे सभायां न मृगं न मानुषम् ॥६॥

सोहमिति—त्वा त्वाम्। गोपायेत रक्षतु। शरणं रक्षिता ॥ ७।८।१३ (३)

एवमिति। दुरुक्तैर्दुर्व्वाक्यैर्मुहुर्दुर्व्वारंवारम्। वरासनं सिंहासनम्। अत्र रुषेति स्थायिन उक्तिः। खड्गं प्रगृह्य स्तम्भं ततारेत्यनुभावयो रुत्पत्तित इत्यावेगाख्यस्य सञ्चारिणः। नृसिंहस्यालम्बनम्। एवमन्यत्र ॥ ७।८।१४ (४)

स इति। स हिरण्यकशिपुर्विक्रमन् विक्रमंकुर्व्वन् ओजसा-विशिष्टः निर्ह्रादम् अट्टहासः। अन्तःसभायां सभामध्ये। तस्य निर्ह्रादस्य पदमाश्रयं (यं) येन निर्ह्रादेन ॥ ७।८।१६ (५)

सत्यमिति। निजभृत्यस्य प्रह्लादस्य भाषितं हरिः सर्व्वगत

सत्त्वमेवं परितो विपश्यन्,
स्तम्भस्य मध्यादनुनिर्ज्जिहानम् ।
नायं मृगो नापि नरोऽतिचित्र-
मक्षो किमेतन्नृमृगेन्द्ररूपम् ॥७॥
मीमांस्यमानस्य समुत्थितोऽग्रतो-
नृसिंहरूपं तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनम्,
स्फुरत्सटाकेश विजृम्भिताननम् ॥८॥
करालदंष्ट्रं करवालचञ्चल-
च्छुरान्तजिह्वं भृकुटिमुखोल्बणम् ।
स्तब्धोर्द्ध्वकर्णं गिरिकन्दराद्भुत-
व्यात्तास्यनासं हनुभेदभीषणम् ॥९॥

इति सत्यं कर्त्तुं अदृश्यत हरिरिति शेषः । न मृगं न मृगसम्बन्धि ॥ ७।८।१७ (६)

स इति—स दैत्यः सर्वं निर्हादकर्त्तारम् प्राणिनम् । परितः सर्वासु दिक्षु विपश्यन् निर्ज्जिहानं निर्गतम् ॥ ७।८।१८ (७)

मीमांसमानस्येति । किमेतदिति मीमांसमानो विचारयन् समुत्थित (समुच्छ्रितः) इत्यन्वयः । अलमत्यर्थं भयानकं भयङ्करम् । प्रतप्तं यच्चामीकरं सुवर्णम् । तद्वर्णे चण्डे अतिकोपाग्निलोचने यस्मिन् रूपे । स्फुरन्त्यः सटाः जटाः केशराणि च कण्ठस्य समन्तात् स्थिताः केशाः । जृम्भितं विकसितं आननञ्च यस्मिन् ॥ ७।८।१९(८)

करालेति । करालवत् खड्गवच्चञ्चलां क्षुरां तद्वत्तीक्ष्णा च जिह्वा

दिविस्पृशत्कायमदीर्घ पीवर-
ग्रीवोरुवक्षःस्थलमल्पमध्यमम् ।
चन्द्रांशु गौरैश्छुरितं तनुरुहै-
र्विष्वग्भुजानीकशतं नखायुधम् ॥१०॥
दुरासदं सर्वनिजेतरायुध-
प्रवेकविद्राभित दैत्यदानवम् ।
प्रायेण मेऽयं हरिणोरुमायिना,
वधःस्मृतोऽनेन समुद्यतेन किम् ॥११॥
एवं ब्रुवन् स्वध्यपतद्गदायुधो-
नदन्नृसिंहं प्रतिदैत्यकुञ्जरः ॥१२॥
अलक्षितोऽग्नौ पतितःपतङ्गमो-
यथा नृसिंहौजसि सोऽसुरस्तदा ।

यस्मिन् । भ्रूकुटीयुतेन मुखेनोल्वनं गिरिकन्दराङ्गतं प्रसारितं वास्यं नासा च यस्मिन् हनोर्भेदेन विभक्तत्वेन ॥ ७।८।२०-२१ (९).

दिवीति । अदीर्घा पीवरा च ग्रीवा गलः उरुविशालं वक्षःस्थलञ्च यस्मिन् । अल्पं कृशं मध्यमं मध्यभागः । तनुरुहैर्लोमादिभिः । छुरितं मिश्रितम् । विष्वक् समन्तात् । भुजा एवानीक शतानि सैन्यशतानि यस्य ॥ ७।८।२१-२२ (१०)

दुरासदमिति । निजं वक्त्रादि । इतरत्खड्गादि । प्रवेकं उत्तमं । अयं नृसिंहः । अनेन समुद्यतेन । मम किं न किमपीत्यर्थः । ७।८।२२-२३ (११)

एवमिति । अभिमुखमागतः ॥ ७।८।२३ (१२)

न तद् विचित्रं खलु सत्त्वधामनि,
स्वतेजसा योऽनुपुराऽपिवत्तमः ॥१३
ततोऽभिपद्याभ्यहनन्नृकेसरी-
कृषा नृसिंहं गदयोरुवेगया ।
तं विक्रमन्तं सगदं गदाधरो-
महोरगं तार्क्ष्यसुतो यथाग्रभीत् ॥१४॥
स तस्य हृत्कोत्कलितस्तदा सुरो-
विक्रीडतो यद्वदहिर्गकुत्सलः ।

अलक्षित इति—स च नृसिंहस्य ओजसि तेजोराशौ पतितः सन्नलक्षितः । अग्नाविव पतङ्गः । तत्तथाविधं तेजो वैभवम् । सत्त्वधामनि विष्णौ । यतोऽसौ पुरा सृष्ट्यादौ तमः । प्रलयान्धकारम् । (१) "आसीदिदं तमोभूतं अप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिवसर्व्वतः" इति वचनात्तदा तमः सद्भावः ॥ ७।८। २४ (१३)

तत इति अभिपद्य अभ्यपतत् । किञ्चिदभिमुखमागत्य पुनराजगाम । दयाविशिष्टः । तं दैत्यं विक्रमं कुर्व्वाणम् । गदाधरो नृसिंहः । तार्क्ष्यसुतो गरुड़ोऽग्रभीत् ॥ (१) "ग्रहेर्भश्छन्दसी"ति भकारः । अप्रयासेन ग्रहणम् । दृष्टान्तेन व्यंजितम् ॥ ७।८।२५ (१४)

स इति—उत्कलित उन्मुक्तः । तदुत्कलनमसाधुमन्यन्त । हृतौकसो हृतस्थानाः । घनामेवाः । च्छदा अपवारणानि येषां ते

(१) मनुः १।५ श्लोकः ।

असाध्वमन्यन्त हृतौकसोमरा-
धनच्छदा भारतसर्व्वधिष्णयपाः ॥१५॥
तं मन्यमानो निजवीर्य्यशङ्कितम्,
यद्वस्तमुक्तो नृहरिं महासुरः ।
पुनस्तमासज्जत खड्गचर्म्मणी,
प्रगृह्य वेगेन गतश्रमो मृधे ॥१६॥
तं श्येन वेगं शतचन्द्रवर्त्मभि-
श्चरन्तमच्छिद्रमुपर्य्यधो हरिः ।
कृत्वाट्टहासं खरमुत्स्वनोल्वणम्,
निमीलिताक्षं जगृहे महाजवः ॥१७॥
विष्वक् स्फुरन्तं ग्रहणातुरं हरि-
र्व्यालो यथाखुं कुलिशाक्षतत्वचम् ।
हार्युरुमादाय ददार लीलया,
नखैर्यथाहिं गरुडो महाविषम् ॥१८॥

तथा । माऽस्मानद्राक्षीदिति भयम् । धिष्णपाः लोकपालाः । हे भारत ! परीक्षित् ॥ ७।८।२६ (१५)

तमिति । स्पष्टं ॥ ७।८।२७ (१६)

तमिति—तं नृसिंहम् । यत् यस्मात्तं दैत्यं श्येनस्येव वेगो यस्य । शतचन्द्रं फलकं । अच्छिद्रं अलक्ष्यमाणावकाशं यथास्यात्तथोपर्य्यधश्च सञ्चरन्तम् । उच्छ्वासेन स्वकृतेन उल्वणम् ॥ ७।८।२८ (१७)

संरम्भदुष्प्रेक्ष्य करालल्लोचनो-
व्याक्ताननान्तं विलिहन् स्वजिह्वया ।
असृग् लवाक्तारुणकेशराननो-
यथान्वमाली द्विपहत्यया हरिः ॥१९॥
नखाङ्कुरोत्पाटितहृत्सरोरुहम्,
विसृज्य तस्यानुचरानुदायुधान् ।
अहन् समन्तान्नखशस्त्रपाणिभि-
र्दोर्दण्डयूथोऽनुपथान् सहस्रशः ॥२०॥
सटावधूता जलदाः पराययुः,
ग्रहाश्च तद्दृष्टि विमृष्टरोचिषः ।

विष्वगिति । ग्रहणेनातुरं व्यग्रम् व्याली यथेति ग्रहणे दृष्टान्तः ॥ ७।८।२९ (१८)

संरम्भेति । संरम्भेन संग्रामेण दुःप्रेक्ष्ये करालेलोचने यस्य स तथा । व्याकृतस्य प्रसारितस्याननस्यान्तं स्वक्किरूपम् । असृजो रुधिरस्य लवैर्विन्दुभिः अक्तानि विलिप्तानि । अतएवारुणानि केशराणाननञ्च यस्य । यथाहरिः सिंहो द्विपस्य गजस्य हत्यया हननेन ७।८।३० (१९)

नखाङ्कुरेति । नखाङ्कुरोत्पाटितं हृत्सरोरुहं यस्य स तं । विसृज्याहनत् । हतवान् । पार्ष्णिर्गुल्फाधोभागः । दोर्दण्डानां यूथं सङ्घो यस्मिन् । अनुपथान् अनुचरागलस्यानुगामिनः ॥ ७।८।३१ (२०)

अभीक्षयः प्लवासहता विचुच्युषु-
र्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥२१॥
द्यौस्तत्सटोत्क्षिप्त विमानसङ्कुला,
प्रोत्सर्पत क्ष्मा च पदाभिपीड़िताः ।
शैलाः समुत्पेतुरमुष्यरंहसा,
तत्तेजसा खं ककुभो नरेजिरे ॥२२॥
ततः सभायामुपविष्टमुत्तमे,
नृपासने संभृत तेजसं विभुम् ।
अलक्षित द्वैरथमत्यमर्षणम्,
प्रचण्डवक्त्रं न बभाज कश्चन ॥२३॥
निशम्य लोकत्रयमस्तकज्वरम्,
तमादिदैत्यं हरिणाहृतं मृधे ।
प्रहर्षवेगोत्कलिताननाम्बुजः,
प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥२४॥

सटेति। सटाभिःस्कन्धस्थैः केशैरवधूताः पराहताः परापतन् दूरे गतिताः। ग्रहाः सूर्य्यादयः ॥ ७।८।२३ (२१)

द्यौरिति। द्यौः स्वर्गः। तत्सटाभिः। उत्क्षिप्तैरूर्द्धं गमितैः विमानैः सङ्कुला सम्बन्धा प्रोत्सर्पत प्रकर्षणोर्द्धंगता। क्ष्मा पृथिवी। अमुष्य नृसिंहस्य। रंहसा वेगेन ॥ ७।८।२३ (२२)

ततो बधानन्तरम्। अलक्षितं द्वाभ्यां रथाभ्यां निर्वृत्तं युद्धम्। अदृष्टप्रतिभटमित्यर्थः ॥ ७।८।२४ (२३)

निशम्येति। उत्फुल्लितं उत्फुल्लम् ७।८।२५ (२४)

तदा विमानावलिभिर्नभस्तलम्,
दिदृक्षतां सङ्कुलमासनाकिनाम् ।
सुरानका दुन्दुभयोऽथजघ्निरे,
गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥२५॥

शिशुपालः ।

इत्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः ।
नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥२६॥

इत्थं निशम्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी,
संश्रावयन् भगवते परुषाण्यभीतः ॥२७॥

ईशो दुरत्ययः काल इति सत्यवतो श्रुतिः ।
वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥२८॥

नाकिनो देवाः । हिरण्यकशिपुः प्रह्लादम् ॥ ७।८।३६ (२५)

इत्यमिति । इत्थं राजसूयाग्रपूजया सभाजितं सत्कृतम् नमो जयेति वदन्तः । तं कृष्णम् ॥ १०।७४।२८ (२६)

इत्यमिति । इत्थं "अर्हति ह्यच्युतः श्रेष्ठ"मित्यादि सहदेव-वाक्यम् । निशम्यश्रुत्वा । दमघोषसुतः शिशुपालः । स्वपीठात् स्वासनात् भगवते भगवदर्थं तमुद्दिश्येत्यर्थः । अत्रामर्षीति स्थायिनः क्रोधस्योक्तिः । गुणवर्णनजातमन्युरिति मत्सरस्य-विभावस्य । उत्-क्षिप्यबाहुमित्यनुभावस्य सञ्चारिणस्तूह्याः ॥ १०।७४।३० (२७)

ईश इति । श्रुतिः प्रसिद्धिः । वृद्धानां भीष्मादीनां । बालः

यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितम् ।
सदस्यतयः सर्वे क्षणो यत् सम्मतोऽर्हणे ॥२९॥
तपो विद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् ।
परमर्षीन् ब्रह्मनिष्ठान् लोकपालैश्च पूजितान् ॥३०॥
सदस्यतीनतिक्रम्य गोपालः कुलपांसनः ।
यथा काकः पुरोडाशं सपर्य्यां कथमर्हति ? ॥३१॥
वर्णाश्रमकुलापेतः सर्वधर्म्म बहिष्कृतः ।
खैरचारी गुणैर्हीनः सपर्य्यां कथमर्हति ॥३२॥

सहदेवः ॥ १०।७४।२१ (२८)

यूयमिति । क्षणोऽर्हणे सम्मत इति यद् बालभाषितं । मामन्ध्वं नमन्ध्वम् सदस्यतयः सभापतयः ॥ १०।७४।२२ (२९)

तप इति । ऋष्यादीनतिव्रज्य १०।७४।२३ (३०)

सदस्यतीति । गोपालो बल्लभः । सपर्य्यां पूजां कथमर्हति न कथमपीत्यर्थः । वस्तुतः गाव इन्द्रियाणि तासां पालोऽधिष्ठाता । कुलं वंशम् पांसयति मलिनं करोति इति कुलपांसनः । (१) विन्मतो-रलुगिति ॥ मतुपो लुक्, टेरित्यकारलोपः । तत्त्वतस्तु कुलपान् (कुत्-सितं लपन्तीति कुलपान्) कुत्सितवाचः । अंसयति विभाजयति । पृथक्करोति निराकरोतीति कुलपांसनः । काको वायसः । अथवा अकं पापं दुःखम् च तन्न अको वक्रगामी तन्नाशक इत्यर्थः । (२) "अक वक्रगताविति" भुवा (भौवा)दौ पठ्यते ॥ १०।७४।२४ (३१)

वर्णेति । सर्वधर्म्मेभ्यो बहिष्कृतम् करणं यस्य यत् सर्वधर्मेभ्यो

---

(१) पाणिनिः ५।२।६५ सूः ।

(२) पाणिनीय वातु पाठो द्रष्टव्यः ।

ययातिनैषां हि कुलं शमं सद्भिर्विहिंसितम् ।
यथा पानरतं शश्वत् सपर्य्यां कथमर्हति ॥३३॥
ब्रह्मर्षि सेवितान् देशान् हित्वैतेऽब्रह्मवर्च्चसम् ।
समुद्रं दुर्गमाश्रित्य बाधन्ते दस्यवः प्रजाः ॥३४॥
एवमादीन्यभद्राणि वभाषे नष्टमङ्गलः ।
नोवाच किञ्चिद्भगवान् यथा सिंहः शिवारुतम् ॥३५॥
ततः पाण्डुसुताः क्रुद्धा मत्स्य कैकेयसृञ्जयाः ।
उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥३६॥
ततश्चैद्यस्त्वसम्भ्रान्तो जगृहे खड्गचर्म्मणी ।
भर्त्सयन् कृष्णमच्छौयान् राज्ञः सदसि भारत ॥३७॥
तावदुत्थाय भगवान् स्वान् निवार्य्य स्वयं रुषा ।
शिरः क्षुरान्तचक्रेण जहार पततो रिपोः ॥३८॥

न लभ्यते तत्फलमयं लम्भयतीत्यर्थः ॥ स्वैरवर्त्ती ईश्वरत्वात् । गुणैर्हीनश्चिन्मात्रत्वात् । अर्थान्तरन्तु वक्तव्यं (वक्तव्यम्) ॥ १०।७४।३५(३२)

ययातीति स्पष्टं ॥ १०।७४।३६ (३३)

ब्रह्मर्षीति स्पष्टम् ॥ १०।७४।३७ (३४)

एवमिति स्पष्टं । मङ्गलं तच्छरीरारम्भकं पुण्यं यस्य स तथा। शिवारुतं शृगालेति शेषः ॥ १०।७४।३८ (३५)

तत इति । उदायुधाः उद्यतास्त्राः ॥ १०।७४।४१ (३६)

तत इति । हे भारत ! परीक्षित् ॥ १०।७४।४२ (३७)

तावदिति । स्वान् भौमादीन् । क्षुरवत् अन्तो यस्य । (आ)पततः आगच्छतः ॥ १०।७४।४३ (३८)

चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ।
पश्यतां सर्वभूतानां उल्केव भुविखाच् च्युता ॥३९॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
रौद्ररसो नाम चतुर्दशोऽध्यायः ॥

एवं रौद्ररसेन भजन्तो भगवत्सायुज्यफलं भवतीत्याहुः चैद्य इति । खात् आकाशात् । शुकः राजानम् ॥ १०।७४।४५ (३९)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायाम् विष्णुभक्तानां
रौद्ररसो नाम चतुर्दशोऽध्यायः ॥१४॥

पञ्चदशोऽध्यायः ।

विष्णुभक्तानां भयानकरसः ।

भयानकरसे कंसः ।

धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ।
पूरयांमास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥१॥
दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ।
बह्वन्यचष्टोभयथा मृत्योर्हैयंगवीनकम् ॥२॥
हतं कुवलयापीड़ं दृष्ट्वा तावपि दुर्जयौ ।
कंसो ननस्यपि तदा भृशमुद्विविजे नृप ! ॥३॥

अथ पिशाचादि विकृतस्वरश्रवण-तद्वलोकन खजन-बन्धुवधादि-दर्शनश्रवण-शून्यगृहारण्यगमनादिविभावम् । करकम्पचलदृष्टि-निरीक्षणहृदय-पादस्पन्दन-शुष्कोष्ठकण्ठत्वङ्मुखवैवर्ण्य-स्वरभेदाद्यनुभावं, शङ्कापस्मार-मरणत्रास चापल्यदैन्यमोहादि व्यभिचारिणं लोमि च प्रकृतिषु स्वाभाविकमुत्तमेषुकृतकम् । भयानकं रसमाह भयानकेति । धनुष इत्यादौ भज्यमानस्य कृष्णेन रोदसीति भू-द्यावौ यं शब्दम् ॥ १०।४२।१८ (१)

दीर्घेति । दीर्घः प्रजागरो निद्राक्षयो यस्य स तथा । अचष्ट अपश्यत् । उभयथा स्वप्ने जागरे च । दौत्यं दूतत्वम् ॥ १०।४२।२७(२)

हतमिति । तौ रामकृष्णौ उद्विविजे उद्विग्नोऽभूत् । हे नृप ! परीक्षित् । शुकः राजानम् ॥ १०।४३।१८ (३)

तं खड्गपाणिं विचरन्तमाशु,
श्येनं यथा दक्षिणसव्यमम्बरे।
समग्रहीद् दुर्विषहोग्रतेजा-
यथोरगं तार्क्ष्यसुतः प्रसह्यः ॥४॥
प्रगृह्य केशेषु चलत्किरीटम्,
निपात्यरङ्गोपरितुङ्गमञ्चात्।
तस्योपरिष्टात् स्वयमञ्जनाभः,
पपात विश्वाश्रय आत्मतन्त्रः ॥५॥
समित्यहोदिग्ध-धिया तमोध्वरम्
पिबन्नदन्वा विचरन् स्वपन् श्वसन्।

तमिति। तं कंसं दक्षिणसव्यं दक्षिणतः सव्यतश्च विचरन्तम्। दुर्व्विषहं अतिदुःसहम्। अतएव उग्रं तेजो यस्य स तया। तार्क्ष्यसुतोऽपि दुर्व्विधान् सर्पान् हन्तीति दुर्व्विषहाः॥ १०।४४।३६ (४)

प्रगृह्येति। चलत्किरीटं कंसं,तुङ्गात् उच्चात्मञ्चात् रङ्गोपरि(स्वयं) निपात्य तस्योपरि स्वयं पपात। अजनाभः इन्द्रनीलोज्ज्वलत्वात्। विश्वाश्रय इत्यनेन गुरुत्वप्रकर्षादुपरियातमात्रेण कंसस्य गतासुत्वमुक्तम्। ननु चक्रादिभिरहत्वा किमित्येवमेव हत इत्याह आत्मेति। अत्र च कंसस्य नारदादिभ्यो भगवत्कर्तृकवधश्रवणात् उत्पन्नाभीः स्थायिभावो भीत इत्यनुक्तः॥ १०।४५।३७ (५)

तस्य च धनुषः शब्दश्रवणदुर्निमित्तं गजवधदर्शनादय उद्दीपनविभावाः। दीर्घप्रजागरादयोऽनुभावाः। त्रासोद्वेगौ च सञ्चारिणौ। अथ भयानकरसेन भजतः फलमाह। स इति। सः कंसः।

ददर्श चक्रायुधमग्रतो यत-
स्तदेवरूपं दुरवापमाप ॥६॥

दुर्वासाः ।

संसद्दह्यमानोऽजितशस्त्रवह्निना,
तत्पादमूले पतितः सवेपथुः ।
आहाच्युतानन्त सदीप्सित प्रभो !
कृतागसं माऽव हि विश्वभावन ॥७॥
अजानता ते परमानुभावम्,
कृतं मयाघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधात-
र्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥८॥

नित्यदा सर्वकालं उद्विग्नधिया विशिष्टः । यदेव पानाद्यवस्थासु ददर्श । तदेवाप फलम्, फलकीर्त्तनस्य च प्रकरणपर्य्यन्ते समुचितत्वेऽपि भीरुभक्तेषु कंसस्यैव मुख्यत्वादत्रैव तत् कृतम् ॥ १०।४४।३८ (६)

स इति । स दुर्वासाः । अजितस्य शस्त्रं चक्रम् । विष्णुनाम्बरीशरक्षार्थं स्व चक्रं प्रहितम् । तस्याजितस्य पादमूले स वेपथुः स कम्पः । कृतागसं कृतापराधम् । मा मां अव रक्ष । हे विश्वभावन । विश्वं भावयसि सत्तां (तां) लम्भयसि । तथा (यद्वा) भावयसि रक्षयसीति ॥ ९।४।६१ (७)

अजानतेति । अघं दुःखं । कृत्योत्पादनरूपां । प्रियाणां ह्यम्बरीषादीनाम् । बहुवचनमत्राम्बरीषस्य पुत्रकलत्रादिविवक्षया । तेऽपिह्यम्बरीषसम्बन्धाद् भगवत्प्रियाः । अपचितिं निस्तारम् । यस्य

पाहि पाहि महायोगिन् देव देव जगत्पते ! ।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥९॥

कुन्ती ।

यथा हृषीकेश खलेन देवकी,
कंसेन रुद्धाति चिरं शुचार्पिता ।
विमोचिताहञ्च सहात्मजा विभो !
त्वयैव नाथेन मुहुर्विपद्गणात् ॥१०॥
अथाद्य नस्त्वं स्वकृते हित प्रभो !
जिहाससि स्वित् सुहृदोऽनुजीविनः ।
येषां न चान्यद् भवतः पदाम्बुजात्,
परायणं राजसु योजितांऽसाम् ॥११॥

तव नाम्नु प्रदिते किं पुनस्त्वयि(पि) दृष्ट इत्यर्थः । अत्र दुर्वाससः स्ववधाशयं स्थायी भावः । दह्यमानत्वमुद्दीपनविभावः । पादपतनं वेपथुरश्रुतेत्याक्रन्दनं चानुभावः ॥ ९।४।६२ (८)

पाहीति । अथ स्वजनवधशङ्का-विभावं भयमाह । उत्तरेत्यादि । हे देव कृष्ण ! यत्र यस्मिन् । अत्र पाहि पाहीत्यनेन स्वपुत्रवधदर्शन-मुत्तरयाख्यल्लोक्तम् ॥ १।८।९ (९)

यथेति । यथा-यथावच्चकारैवोपमार्थस्य लब्धत्वात् । मुहु-र्विपद् गणादिव्यतिरेकः ॥ १।८।२३ (१०)

अपीति । द्वयाशयार्थं निषेधयति । अपि अहो जिहा-ससि स्वान् हातुमिच्छसि । किञ्च वयं हि सुहृदोऽनुजीविनश्च । त्वं स्वकृते हितः स्वस्मिन् आत्मार्थे कृतमोहितमभिलषितं येन स तथा ।

प्रह्लादः ।

वस्तोऽस्मदहं क्षपण वत्सल दुःसहोग्र-
संसार चक्रकदनाद् ग्रसतां प्रणीतः ।
बद्धः स्वकर्म्मभिरुशत्तम तेऽङ्घ्रिमूलम्,
प्रीतोऽपवर्ग शरणं ह्वयसे कदानु ॥१२॥
यस्मात् प्रिया प्रियवियोगसयोग जन्म-
शोकाग्निना सकल योनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाहम्,
भुमन् भ्रमामि वदमे तवदास्य योगम् ॥१३॥
सोऽहं परस्य सुहृदः परदेवताया-
लोलाकथा स्तव नृसिंहविरिञ्चगीताः ।

स्वजनस्य कामान् पूरयसीत्यर्थः । राजसु क्षत्रियेषु सुयोजितं सुष्ठु योगं नीतम् । अं हः पापं कर्म्म यैस्ते तया । कुन्ती श्रीकृष्णम् ॥ १।८।३७ (११)

वस्तोऽस्मेत्यादि । हे उशत्तमनृसिंह ! कदनं दुःखम् । असतां मध्ये प्रणीतः प्रक्षिप्तोऽहं स्वकर्म्मभिः । ते अङ्घ्रिमूलम् प्रति कदा आह्वयसे आह्वयसि ॥ क्षिप्तं अपवर्गं मुक्तिरूपम् । अरणं शरणम् । हे भुमन्, अस्मिन् प्रपञ्चोपाधौ तयाऽहं भ्रमामि । अतस्तवदास्य-योगं वद ॥ ७।८।१६ (१२)

यस्मादिति । प्रिय विप्रयोगजन्मना अप्रिय संयोगजन्मनाच शोकाग्निना दह्यमानः यद् दुःखौषधम् । तदपि दुःखं तत् सम्पादनस्य दुःखात्मकत्वात् ॥ ७।८।१७ (१३)

अज्ञःस्तितर्म्मनु गुणन्गुणविप्रयुक्तो-
दुर्गाणि ते पदयुगालय हंस सङ्गः ॥१४॥
बालस्य नेह शरणं पितरौ नृसिंह-
नार्त्तस्य चागद मुदन्वति मज्जतोनौः।
तप्तस्य तत्प्रति विधिर्य इहाञ्जसेष्ट-
स्तावद्विभो तनुभृतां त्वदुपेक्षितानाम् ॥१५॥
कुल्लाशिषः श्रुतिसुखाभृगतृष्णिकाभा
क्षेत्रं कलेवर मशेष रुजां विरोहः।

ननु दास्ययोगस्य किं फलं तत्राह। सोहमिति। हे नृसिंह! गुणैर्ज्ञानादिभिर्विप्रयुक्तो हीनस्तवकथाः। पुनः पुनर्गुणन्नङ्गसा दुर्गाणि तितर्म्मि तरामि प्रियत्वात् सुखसेव्यत्वम्। सुहृत्त्वा दुपकर्त्तृकत्वं देवत्वादुपकारसमर्थत्वम्। विरिञ्चिगीता इति सदनुष्ठितोऽयं मार्ग इत्युक्तम्। ते पदयुगलालयः आश्रयो येषां हंसानां योगिनां तेषां सङ्गो यस्य स तथा। तत्सङ्गाद्धि कथा निर्वाहः॥ ७।८।१८ (१४)

ननु दुःखस्य प्रतीकारः क्रियताम् किं दास्येनेयत आह। बालस्येति। हे नृसिंह! इहलोके यः पदार्थ इहदुःखे शरणम् रचिता इष्टः सम्मतः सत्व (तु)दुपेक्षितानां अज्ञः(ज्ञः)निश्चितं न भवत्येव। तावदवधारणे तस्यैव प्रपञ्चः। बालस्येत्यादि। आर्त्तो रोगी। अगदमौषधम्। तत्प्रतिविधि स्तत्प्रतीकारः॥ ७।८।१९ (१५)

ननु विरक्तं दुःखं न बाधते ऽतो विरक्तेन भवितव्यमिति चेत्तत्राह। कुचेति। आशिषो विषया मृगतृष्णिकारूपाः। मरीचिकावभासाः। तथाहि—मृगतृष्णारविरश्मिरूपापि जलरूपाव-

निर्विद्यते न तु जनो यदहोति विद्वान्,
कामानलं मधुलवैः शमयन् दुरापैः ॥१६॥
क्वाहं रजः प्रभव ईश तमोऽधिकोऽस्मिन्,
जातः सुरेतर कुले क्वतवानुकम्पा ।
न ब्रह्मणो न तु भवस्य नवै रमाया-
यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥१७॥
नैषा परावरमतिर्भवतो ननुस्याज्-
जन्तोर्यतात्म सुहृदो जगतस्तथापि ।
सं सेवया सुरतरोरिव ते प्रसादः,
सेवानुरूप मुदयो न परावरत्वम् ॥१८॥

भासते। तथा विषयादुःखरूपा अपि सुखरूपा इव दृश्यन्त इति भावः। विरोहः प्ररोहः स्थानम्। यद्यपि यद्यपि इति विद्वान् एवञ्चेति। तथापि न निर्विद्यते न विरज्यते। कामानलमिच्छाग्निं मधुतुल्यत्वाद् मधुसुखम् तस्यलवैर्लेशैः ॥ ७।८।२५ (१६)

क्वपल वत्सल इत्युक्तम् तदेव दर्शयति। क्वाहमिति। रजः प्रभवो रजोऽधिकारः। सुरेतरा दैत्याः। कासाऽनुकम्पा यन्मे शिरसि पद्मकररूप प्रसादोऽर्पितः। ब्रह्मादिभि स्विभिः षष्ठ्यन्तैः। पुत्रमित्रकलत्रेष्वपि प्रेमपात्रेष्वपि नैवंविधं प्रसादः क्वतः पूर्व्वो भवतेति उक्तम् ॥ ७।८।२६ (१७)

ननु क्वपालुश्चेत् कथं फलवैषम्यं तत्राह। नैषेति। हे भगवन्! एषा परावरमतिः अयमुत्तमः अयमध्यम इति बुद्धिर्जन्तोर्यथा क्वेशकर्म्माद्युपेतस्य त्वं हि जगत आत्मना स्वेनैव सुहृत्। न तु निमित्त-

एवं जनं निपतितं प्रभवाहि कूपे,
कामाभिकाम मनुयः प्रयतन् प्रसङ्गात् ।
कृत्वात्मसात् सुरर्षिणा भगवान् गृहीतः,
सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥१९॥
मत् प्राणरक्षण मनन्त पितुर्वधश्च,
मन्ये स्वभृत्य ऋषिवाक्य मृतंविधातुम् ।
खड्गं प्रगृह्य यदवोचदसद्विधित्सु-
स्त्वामीश्वरोमदपरोऽवतु कं हरामि ॥२०॥
नैतन्मन स्तव कथासु विकुण्ठनाथ !
संप्रीयते दुरित दुष्ट मसाधु तीव्रम् ।

वशात्। तथापि सेवकस्यैव तत्फलम्। तच्च सेवानुरूपम्। न तु परावरत्वमुदये फले कारणम्। एतच्च सुरतरौ दृष्टम्। स हि पत्र-पालच्छेनोऽप्युपसर्पतामेव यथाफलं प्रसूते न तु दूरस्थानाम्। सेवाकृतं वैषम्यम् फलतीति कृपालुत्वं अतो न विरोध इत्यर्थः ॥ ७।८।२७ (१८)

तच्च (दु)क्तसेवापि फलदेत्याह एवमिति। प्रभवाहि कूपे संसारे। कालसर्परूपे पतितं जनमनुजनेन सहप्रसङ्गात्। प्रयतम् सुरर्षिणा नारदेन। उद्धृतः कामाभिकामं विषयाभिलाषिणम् ॥ ७।८।२८ (१९)

यदिति। स्वभृत्यो हिरण्यकशिपुः स एव ऋषिः तस्य वाक्यं ऋतं सत्यं सत्यं कर्त्तुं इति प्रकृतिभावः। किन्तदुवाक्यं यदसद्विधित्सुर्मां जिघांसुरवोचत्। अहन्ते कथं शिरोहरामि। यदन्योय ईश्वरोऽस्ति सत्वामवत्विति ॥ ७।८।२९ (२०)

कामातुरं हरष शोकभयैषणार्त्तम्,
तस्मिन् कथं तव गतिं विसृजामि हीनः ॥२१॥
जिह्वैषतोऽच्युत विकर्षति मावितृप्ता,
शिश्नोऽन्यत स्त्रगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यत श्चपलदृक् क्वच कर्म्मशक्ति-
र्बह्वयः सपत्न इव गेह पतिं लुनन्ति ॥२२॥
एवं स्वकर्म्म पतितं भववैतरण्या-
मन्योन्य जन्म मरणाशन भीत भीतम् ।
पश्यन् जनं स्वपर विग्रह वैरमैत्रम्,
हन्तेति पारचर मोहय मूढमद्य ॥२३॥

ननु तथापि खिन्नत्वेन सत्स्वरूपमात्मनि विस्मृत्य त्वां तत्राह । नैतदिति । तव कथासु नप्रीयते नतु तुष्यति । यतो दुरितैः पापैर्दुष्टम् अतएव तीव्रम् । यथा तथा असाधु एषणाः पुत्रैषणाद्या-अतस्तस्मिन् कथं तवगतिं स्वरूपम् विसृजामि ॥ ७।८।३९ (२१)

एषणान्तरतामेवाह । जिह्वेति । मामां अतृप्ता क्षुधिता । प्राणो नासाग्रसञ्चारीवायुः । अन्यतो गन्धः दृक्चक्षुः । कर्म्मशक्तिः कर्म्मेन्द्रियाणि ॥ ७।८।४० (२२)

इदानीं सर्वार्थं प्रार्थ्यते श्लोकद्वयेन । एवमिति । हे पारचर ! परतोरस्य भववैतरण्यां संसारप्रवाहे पतितं जनमित्येवं पश्य । यथा त्वां कृपया पश्यसि तथेत्यर्थः । पिपृहि कृपावलोकेन पालयेत्यर्थः ॥ ७।८।४१ (२३)

कोऽन्वङ्ग तेऽखिल गुरो भगवन् प्रयास-
उत्तारणोऽस्य भव संभव लोपहेतोः।
मूढेषु वै महदनुग्रह आर्त बन्धो!
किन्तेन ते प्रियजनानभु सेवतां नः ॥२४॥

श्रीबद्धाः।

उत्पत्त्यप्यन्यशरण उकक्लेशदुर्गेऽन्तकोग्र-
व्यालान्विष्टे विषय मृगतृष्यात्मगेहोरु भारः।
द्वन्द्वश्वभ्रे खल मृगभये शोकदावेऽज्ञसार्थः,
पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥२५॥

कोऽन्वङ्गेति। अन्योऽन्यं परस्परम्। जन्मादित्यो भीतं कालाच्च भीतं स्वपरविग्रहयोः शरीरयोर्यत्रासम्भवं वैरमैत्रे यस्य तम्। अस्य जगतः भवसम्भवलोपाः सृष्टिस्थितिलया महतामनुग्रहश्च मूढेषु। ननु किमन्यप्रसङ्गेन त्वां तावदुत्तारयिष्यामीति चेत्तत्राह। तेन मोक्षेण किं न किमपीत्यर्थः। वयं तद्भृत्यसेवयैव कृतार्था इत्यभिप्रायः। तत्र च त्वत्तोऽस्मीत्येतं दारभ्य प्रकरणे एव भयानको रसः। प्रह्लादो नृसिंहम् ॥७।९।४२ (२४)

उत्पत्तीति। उत्पत्तिः संसारः। अशरणे रक्षकहीने। व्याला:। अन्विष्टो दृष्टः (इष्टः) मृगतृड् मृगतृष्णा। आत्मा देहो गेहञ्च। उरुर्भारोयस्य द्वन्द्वानि हर्षविषादादीनि। स्वभ्रंगर्तः। मृगाः सिंहादयः। ज्ञाः पण्डितम्मन्याः। तेषां स्वार्थं सङ्गः उपसृष्ट उपद्रुतः। कदा याति कोऽपिकदापि न याति। मार्गान्तरयतीत्यर्थः। अत्र च घोर संसार दर्शनात्। सदस्येषु भयमुत्पन्नमिति प्रकरण-

मुचुकुन्दः ।

चिर मिह व्रजिनार्त्तस्त्व मानीऽनुताप-
रविद्दषष्वड़मिदोलव्य शान्तिः कथञ्चित् ।
शरणद समुपेत स्तत् पदाब्जं परात्मन् !
अभयमृतमशोकं पाहिमापन्नमीश ! ॥२६॥

रुद्रज्वरः ।

तप्तोऽहं ते तेजसा दुःसहेन,
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत् तापो देहिनां तेऽङ्घ्रि, मूलम्,
नो सेवेरन् यावदाशानुबद्धाः ॥२७॥

नारदः ।

दृष्टं तवाङ्घ्रि, युगलं जनतापवर्गम्,
ब्रह्मादिभिर्हृदि विचिन्त्य मगाधबोधैः ।

देत्यनेन व्यञ्जितम् । भीतानां हि शरणेच्छा । सदस्या भगवन्तम् ॥४।७।२८ (२५)

चिरमिति । व्रजिनं दुःखम् । अनुतापैः पश्चात्तापैः । अविद्दषः षट् इन्द्रियाण्यमित्राणि यस्य शंसुखरूपम् । अभयमद्वितीयत्वात् । ऋतमबाध्यत्वात् । अशोकमानन्दघनत्वात् । आपन्नं शरणागतम् । मुचुकुन्दः श्लोकषाम् ॥१०।५१।५७ (२६)

तप्तोऽमिति । शान्तः सन्नुग्रः शान्तोग्रः तेन शीतेनेत्यर्थः । रुद्रज्वरः श्लोकषाम् ॥१०।६३।२८ (२७)

एवं भयानक रसेन भजतोऽनिष्टहानि रिष्टाप्तिश्च स्यादित्याह ।

संसार कूपपतितोत्तरणावलम्बम्,
ध्यायं श्वरास्यनुग्रहाण यथास्मृतः स्यात् ॥२८॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
भयानकरसो नाम पञ्चदशोऽध्यायः।

दृष्टमिति। यत्तवाङ्घ्रियुगलंध्यायेत् स्मरामीत्यतोऽन्यत् किं प्रार्थनीय मस्तीत्यभिप्रायः। जनानां समूहो जनता। तस्यापवर्गं कैवल्यम्। ब्रह्मानन्दादपि सुतरामभिलषणीयमित्याह। ब्रह्मादिभिरिति। मुक्तानां स्पृहनीयत्व मुक्ता मुमुक्षूणान्तदाह। अगाधेति। यद्यपि मदङ्घ्रि दर्शनं परमपुरुषार्थजातञ्च तत्तथापि किञ्चिदाद्रियतामिति चेत्तत्राहानुग्रहाणेति। स्मृतेर्विपरिलोपोमाभूदित्यर्थः। फलकीर्त्तनार्थमेवास्यश्लोकस्येहपाठः। अन्यथा भयशङ्काया अभावादनर्थकः पाठःस्यान्नारदः श्रीकृष्णम् ॥१०।६८।१८ (२८)

इति हेमाद्रि विरचितायां कैवल्यदीपिकायां विष्णुभक्तानां
भयानकरसो नाम पञ्चदशोऽध्यायः समाप्तः ॥

षोड़शोऽध्यायः ।

वीभत्सरसे पुरुरवाः ।

क्वायं मलौमसः क्वायो दौर्गन्ध्यद्यात्मकोऽशुचिः ।
क्वगुप्साः सौमनस्याद्यास्योऽविद्ययाकृतः ॥१॥
पित्रोः किं स्वंनु भार्यायाः स्वामिनोऽग्नेः श्वशुभ्रयोः ।
किमात्मनः किंसुहृदामिति योनावसोयते २॥
तस्मिन् कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते ।
अहो सुभद्रं सुनसं सुस्मितञ्च मुखं स्त्रियाः ॥३॥

अथ हृद्व्रण पूतिगन्ध कृमिकीटानां दर्शन श्रवणादिभावं अङ्ग संकोचहृल्लास नासा मुख विवित्त पानाच्छादन निष्ठीवनाद्यनुभावम् अपस्मारौग्रमोहमदादि व्यभिचारिणं जुगुप्सा स्थायिभावं विभक्त-समाह । विभक्तेति । क्वायमित्यादि । मलौमसो मलिनः । सौमनस्यं पुष्पतुल्यत्वम् । तच्चगन्धेन दौर्गन्ध्यादि व्यतिरेकात् । अध्यासः अतस्तद्रूपे तद्रूप बुद्धिः (१) ॥११।२६।१८ (१)

पित्रोर्रति । नावसीयते न निष्ठीयते । अत्र पित्रादीनां क्रमाज्जननौप क्रमादाह । भद्रणाधिष्ठानो दोष योगाः स्वल्वहेतवः ॥११।२६।१७ (२)

तस्मिन्निति । तस्मिन्निश्चिते अमेध्ये अपवित्रे तुच्छेन अल्पेन

---

(१) "कोऽयमध्यासोनामेति स्मृतिरूपः परत्र पूर्वं दृष्टावभासः अतस्मिं स्तद्बुद्धि रित्यवोचाम" शारीरकभाष्यम् । १।१।१। आध्यासोमिथ्याज्ञानः अविद्या अज्ञानमिति यावत् ।

त्वङ्मांस रुधिर स्नायु मेदोमज्जास्थिसंहतौ ।
विन्मूत्र पूये रमतां कृमीणां कियदन्तरम् ॥४॥
पुंश्चल्यापहृतं चित्तं कोऽन्यो मोचितुं प्रभुः ।
आत्मारामेश्वरत्यक्तं भगवन्त मधोक्षजम् ॥५॥

अवधूतः ।

देहो गुरुर्मम निरक्ति विवेक हेतुः,
विभ्रत् सत्त्व निधनं सतताभ्युदर्कम् ।
तत्त्वान्यनेन विमृशामि यथा तथापि,
पारम्यमित्यवसितो विचराम्यसङ्गः ॥६॥

निष्ठानाशोऽस्येति तुच्छ निष्ठम्। विषज्जते विशेषात्सङ्गं करोति तदाह ॥११।२६।२० (३)

त्वगिति। अहो इत्यादि। विड़ादीनां त्रयाणां द्वन्द्वैकत्वम्। त्वगादीनां समानां संहतिः सङ्घातो यस्मिन् विन्मूत्रपूये। तत्र रमतां प्राणिनाञ्च कृमीनाञ्च कियदन्तरं न कियदपीत्यर्थः ॥११।२६।२१ (४)

पुंश्चली जर्व्वशी। वु अहो। आत्मनि स्वस्वरूपे सदानन्द घने। आरमन्ति सर्व्वकाल मभिव्याप्य क्रीड़न्ति मनोव्यापारयन्ति ये ते तथा। जीवन्मुक्ता इत्यर्थः। तेषामीश्वरं नित्यमुक्तत्वात्। अत्र कायमिति छेपार्थेण जुगुप्सा गम्यते। तस्या देहदोषा-उद्दीपन विभावाः। सञ्चारिणस्तूह्याः। जगुप्सायुक्तस्य चेतसो भगवद्विषयत्वाद् भक्तिरसत्वम्। ऐलः श्रीकृष्णम् ॥११।२३।१५ (५)

देह इत्यादि। कुतोगुरुः यतो विरक्ति हेतुः। विरक्तिहेतुत्वं कुतः यतः सत्त्वनिधनम्। जन्मनाशौ विभ्रदिति। उदर्कं उत्तर-कालफलम्। विवेकहेतुत्वमाह तत्त्वानीति। तत्त्वानि पुरुषादीनि

जायात्मजार्थं पशु भृत्य गृहाप्तवर्गान्,
पुष्णाति यत्प्रिय चिकीर्षया वितन्वन् ।
स्वान्ते सकृच्छ्रमवरुद्ध धनः सदेहः,
स्वृष्ट्वास्य वौज मवसीदति वृक्ष धर्म्मा ॥७॥
लब्ध्वासुदुर्लभमिदं बहु सम्भवान्ते,
मानुष्यमर्थदमनित्य मपीहधीरः ।
तूर्णं यतेत न पतेदनुमृत्यु यावत्-
निःश्रेयसाय विषयः खलु सर्व्वतः स्यात् ॥८॥

यथा यथावत् । यद्यप्येवं यथापि पारोक्ष्यम् श्वश्रृगालादिभक्ष्यमिदमिति निश्चितोऽयम् । अतोऽसङ्गोममत्वहीनोऽहं विचरामि ॥११।८। २५ (६)

जन्मनाशवत्तामेवाह । जायेति । यस्य देहाभिमानेन आत्मनः प्रियचिकीर्षया वितन्वन् सम्पादयन् सन् पुष्णाति सकृच्छ्रं यथास्यात्तथा । अवरुद्ध मुपार्ज्जितं धनं येन । पुण्यपापे । अवसीदति क्लिश्यति । वृक्षधर्म्मः यथा वृक्षान्तर जनकं वीजं प्रसूय नश्यति । तथाऽयमित्यर्थः ॥११।८।२६ (७)

विवेकहेतुत्वं पुनराह लब्ध्वेति । मानुष्यं मनुष्यत्वम् । बहूनां-जन्मनामन्ते यद्यप्यनित्यं तथाप्यर्थदं मोक्षदं मोक्षादन्यस्यानर्थत्वात् । निःश्रेयसाय यतेत । अनुमृत्युः मृत्योः सम्मुखम् । ननु विषयार्थमेव प्रयततां किमन्येन अत्राह विषया इति । सर्व्वतो नरकादावपि सुलभत्वात् अत्र विभावादि (अलङ्कार) विवेक प्राग्वत् । अवधूत यदुम् ।११।८।२८ (८)

पिङ्गला ।

सन्तं समीपे रमणं रतिप्रदम्
वित्तप्रदं नित्य मिमं विहाय ।
अकामदं दुःख भयाधि शोक-
मोहप्रदं तुच्छ महं भजेऽन्या ॥९॥
अहो मयात्मा परितापितो वृथा,
सा क्ल्ँत्य वृत्त्यति विगर्ह्य वार्त्तया ।
स्त्रैणान्नरादर्थयतोऽनुशोच्यात्,
क्रीतेन वित्तं रतिमात्मनेच्छतो ॥१०॥

सन्तमिति । अहमन्या इममात्मानं विहाय । अन्यं रमणं भजामि । सेव्यासेव्यत्व द्योतनाय द्वयोर्विशेषणानि । वित्तं विचारः "विदृ विचारणे" *(२) इत्यस्य भावे निष्ठायां रूपम् । 'नुद विदेति' वा णत्वम् । मोहः भोगासङ्गाद्विवेकाभावः अत्र मेवाह अहो इत्यादि । चित्तम् पिङ्गला ॥११।८।३१ (९)

अहो इति । धर्म्मेण अति विगर्ह्यया वार्त्तया जीविकया दुर्लभस्य वस्तुनः प्राप्तौ सुखं भवति तदपि नास्तीत्याह । स्त्रैणादिति । स्त्रीणां वश्यान्नरान्न तु देवादित्यर्थः । न च वित्तमयोऽर्थेति । अर्थदृष्णायुक्तात् कृपणादित्यर्थः । न चैवं विधेनापि सह सदैव सम्भोगोऽस्तीत्याह । अनुशोच्यादिति । मृत्युग्रस्तादित्यर्थः ।

---

(२) पाणिणीय गणपाठे । धातु प्रदीपकारश्च,—

वेत्तिरूपं विज्ञाने विन्ते विंद विचारणे ।
विद्यते विद्यसत्तायां लाभे विन्दति विन्दते ॥

यद्स्थिभिर्निर्म्मित वंश वंश्य-
स्थूणं त्वचारोम नखैः पिनद्धम् ।
क्षरन्नवद्वार मगारमेतद्-
विन्मूत्रपूर्णं मदुपैतिकान्या ॥११॥

मुचुकुन्दः ।

विमोहितोऽयं जन ईशमायया,
तदीययात्वां न भजत्यनर्थदृक् ।
सुखाय दुःख प्रभवेषु सज्जते,
गृहेषु योषित् पुरुषश्च वञ्चितः ॥१२॥
लब्ध्वा जनो दुर्लभमत्र मानुषम्,
कथञ्चिदव्यङ्गमयत्नतोऽनघ ।

क्लीतेन विक्लोतेन आत्मना देहेनरतिं वित्तञ्चेच्छति । याऽहं त्वयेत्यर्थः ॥११।८।३३ (१०)

यदिति । यत्र विवेकात् पूर्वं वस्तुबुद्धिः तस्यैव विचार्य्यमाणत्वे वीभत्सतेत्याह यदित्यादि । एतदागारं गृहंमदन्या का उपैति न कापीत्यर्थः । एतत् किं यदु यदित्यादि । वंशा वेणवः वंश्यं तदाधारभूतं काष्ठं स्थूणाः स्तम्भाः । पिनद्धं बद्धम् । क्षरन्ति नव द्वाराणि यस्मिन् तत् । पिङ्गला स्वात्मानम् ॥११।८।३३ (११)

विमोहित इति । जनो योषित् पुरुषश्चेतिविवोजनः तदीयया मायया विमोहितो वञ्चितश्च विमोहितत्वादनुचिते न प्रवर्त्तते । वञ्चितत्वादनुचिते प्रवर्त्तते च पदद्वयेनाह । अनर्थे प्रपञ्चेदृग् यस्य स तथा । दुःखस्य प्रभवो जन्म येषु तेषु ॥१०।५१।४५ (१२)

पादारविन्दं न भजत्यसन्मति-
र्गृहान्धकूपे पतितो यथा पशुः ॥१३॥
ममैषकालोऽजित निष्फलोगतो-
राज्यश्रियोन्नद्धमदस्य भूपतेः ।
मर्त्यात्मबुद्धेः सुतदार कोशभु-
ष्वासज्जमानस्य दुरन्तचिन्तया ॥१४॥
कलेवरेऽस्मिन् घटकुड्य सन्निभे,
निरूढमानो नरदेवइत्यहम् ।
हतोरथेभाश्व पदात्यनीकपैः-
गांपर्यटं स्त्वागणयन् सु दुर्मदः ॥१५॥
प्रमत्तमुच्चैरिति कृत्य चिन्तया-
प्रवृद्धलोभं विषयेषु लालसम् ।

विमोहितत्वमेव पुनः प्रपञ्चयति लब्धेति। कथञ्चित् कुतश्चित पुण्याद्व्यङ्गं अविकलं असति विषये मतिर्यस्य अहमपि तथेति द्वाभ्यामाह ॥१०।५१।४६ (१३)

ममेति। उन्नद्ध उत्कटः मदोगर्वः मर्त्ये देहे आत्मबुद्धिर्यस्य। कोशोऽर्थसञ्चयः। चिन्तया आसज्जमानस्यासङ्गंप्राप्यमानस्य ॥ १०।५१।४७ (१४)

कलेवर इति। अहमिति नरदेव इति च निरूढाभिमानो गां भुवं पर्य्यटन् त्वा त्वां अगणयत् दुर्मदोस्मीत्यर्थः दुर्मदानाञ्च कामभयं द्वाभ्यामाह ॥१०।५१।४८ (१५)

त्वमप्रमत्त सहसाभिपद्यसे,
क्षुल्लेलिहानोऽहि विवाखुमन्तकः ॥१६॥
पुरा रथैर्हेम परिष्कृतै श्चरण्,
मतङ्गजैर्वानरदेव संज्ञितः ।
स्वएव कालेन दुरत्ययेन ते,
कलेवरोविट् कृमि भस्म संज्ञितः ॥१७॥
निर्जित्य दिक्चक्रमभूतविग्रहो-
वरासनस्थः समराजवन्दितः ।
गृहेषु मैथुन्य सुखेषु योषिताम्
क्रौड़ामृगः पुरुष ईशानीयते ॥१८॥
करोति कर्म्माणि तपः सुनिष्ठितो-
निवृत्तभोगस्तदपेक्षयाददत् ।

प्रमत्तेति इदं कृत्वेदं करिष्यामीति चिन्तया प्रमादिनं उच्चैरत्यर्थं लालसं कामिनं सावधानत्वं सहसा वेगेन । क्षुधालेलिहानः क्षुद्भागम् अभियद्यसे प्राप्नोसि ॥ १०।५१।४८ (१६)

परिष्कृतैर्भूषितैः । मतङ्गजा हस्तिनः । त्वया कालेन स्वादि भक्षिते विट्संज्ञा दग्धे भस्म संज्ञा, संज्ञित इति "तारकादित्वा" दितच् वा ॥१०।५१।५० (१७)

मनुष्यत्वेऽपि स्त्रीप्रसङ्गः क्वाप्यधर्म्मानुष्ठानं वा जुगुप्सितमित्याह निर्जित्यदिगितिद्वाभ्याम् । मैथुन्यं मिथुनस्य कर्म्म । नीयते नितरां क्रियते प्राप्यत इत्यर्थः ॥१०।५१।५१ (१८)

पुनश्च भूयास महं खराडिति,
प्रवृद्धतर्षो न सुखाय कल्पते ॥१९॥

जरासन्धबद्धराजानः ।

त एव कृष्णाद्य गभीर रंहसा,
दुरन्तवीर्येण विचालिताःश्रियः ।
कालेनतन्वा भवतोऽनुकम्पया,
विनष्टदर्पा ह्यरयो स्मरामि ते ॥२०॥
अथो न राज्यं मृगतृष्णिरूपितम्,
देहेन शश्वत् पतता रुजां भुवा ।

करोतीति । तयः सुनिष्ठितो निष्ठां प्राप्त । तदपेक्षया विना भोगापेक्षया निवृत्तभोगोदर्क दानञ्च करोति । पुनर्जन्मान्तरे महान् स्वराट् भूयासम् अमेयमिति । प्रवृद्धाभिलाषो न सुखाय कल्पते । सुखकुन्दः श्रीकृष्णम् ॥१०।५१।५२। (१९)

एवं वीभत्सरूपेण भक्तिरसमनुभवतो भगवत् स्मृति रन्यास्मृतिश्च स्यादिति क्रमाद्वाभ्यामाह । तएवेति । हे श्रीकृष्ण ! ये प्राग्ऐश्वर्य मदान्धा अभूम त एव वयं अद्य ते चरणौ स्मरामः । यतो विनष्ट दर्पा स्वदेव कुतो यतस्त्वत्तन्वा कालेन श्रियः सकाशाद् विचालिताः ॥१०।७३।१३ (२०)

अथ इति । अथस्त्वत्चरणस्मरणानन्तरं मृगतृषा मरीचिकया निरूपितं व्याख्यातम् । तत्तुल्यमित्यर्थः । रुजां रोगाणां भुवा

उपासितव्यं स्पृहयामहे विभो !
क्रियाफलं प्रेतयच्च कर्णरोचनम् ॥२१॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
वैभवरसो नाम षोड़शोऽध्यायः ॥

आश्रयेण अनेन भोज्यभोजकयोरप्यनित्यत्वमुक्तम्। उपासितव्यं न स्पृहयामहे। सेव्य बुद्धया न गृह्णीम इत्यर्थः। यच्च प्रेत्य परलोकं क्रियाया ज्योतिष्टोमादेः फलम् तदपि न स्पृहयामहे। यत स्तत्कर्णरोचनं केवलं श्रवणमात्रेण प्रीतिजनकं न तु भोगत्वेन। अविशुद्धिः क्षयादिदोष (१) दुषितत्वादितिभावः राजानः श्रीकृष्णम् ॥१०।७३।१४ (२१)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां
वैभवरसो नाम षोड़शोऽध्यायः ॥

---

(१) "दृष्टवदानुश्रविकः स ह्यविशुद्धि क्षयातिशययुक्तः" "स्यादिति पञ्चशिखाचार्येश्वरकृष्णाः स्वल्पः सङ्कटः सपरिहारः सप्रत्यवमर्शः।" योगदर्शनम्, २—१३।—

सप्तदशोऽध्यायः ।

शान्तरसे नारदः ।

तत्रान्वहं कृष्ण कथाः प्रगायता-
मनुग्रहेणाश्रृणवं मनोहराः ।
ताः श्रद्दधा मेऽनुपदं विशृण्वतः,
प्रियश्रवस्यङ्ग ममाभवद्रतिः ॥१॥
तस्मिंस्तदालब्ध रुचेर्महामते !
प्रियश्रवस्यस्खलिता मतिर्मम ।

अथ वैराग्य संसार भीरुता तत्त्वज्ञान वीतराग परिशीलन परमेश्वरानुग्रह तपोवन विविक्त सेवादि विभावं यम नियमाध्यात्मशास्त्र चिन्तन सर्वभूत समत्व दर्शन परार्थकारित्वाद्यनुभावं धृति स्मृतिमति निर्व्वेद हर्षादि व्यभिचारिणं शमस्थायिभावं शान्तिरसमारभते । शान्तेति । तत्रेत्यादि । तत्र मुनि समीपे अश्रृणवं श्रुतवानहम् अनुपदं पदे पदे । पदार्थोऽपि न तिरोहित इत्यर्थः । प्रियश्रवसि श्रीकृष्णेरतिर्भक्तिः । अत्रयामिरतिर्ममेत्यरुचिमतार्थम् । अङ्ग अङ्गो व्यासः ॥१।५।२६ (१)

यदाह मैनत् सदसत् स्वमायया,
पश्येमयि ब्रह्मणि कल्पितं परे ॥२॥
इत्थं शरत् प्रावृषिकावतू हरे
र्विशृन्वतोमेऽनुसवं यशोऽमलम् ।

ननु किंरत्येतिचेत्तत्राह । तस्मिन्निति । तस्मिन् श्रोत्रणे प्रियश्रवणि अस्खलितामतिः निःसंशयं ज्ञानं यत्रैवरतिस्तत्रैवमति रित्यर्थः । यया मत्या सदसत् स्थूल सूक्ष्म रूपद्वयं मय्येव मायया मय्येव ब्रह्मरूपे कल्पितम् आरोपितम् रज्जुभुजङ्गवत् (१) । पश्ये अद्यापि पश्यामि । एतदिदमिति पदद्वयेन यथाऽन्यत्र सत्यो भुजङ्गो रज्वामारोपितः न तत्रा अथ न सत्यं रूप (मिदं) द्वयं ब्रह्मण्यारोपितम् । किन्त्विदमिदमेव इत्युक्तम् । अनिर्व्वाच्यमित्यर्थः ॥१।५।२७ (२)

महानुभाव प्रसङ्गादचिरेनैव तत्त्वज्ञानमुत्पद्यते इत्याह इत्थमिति इत्थं अनुसवं अनवरविसारि किम्भूता भक्तिः आत्मनोऽतः करणस्य रजस्तमसी अपहन्तीति । तया शुद्ध सत्वाभिकेनत्यर्थः । सात्त्वानस्यैव पराकाष्टा । "यस्यामभ्युदितायां प्रत्यदितख्याति रेवं मन्यते प्राप्तं मे प्रापणीयं क्षीणाः क्षेतव्याः क्लेशा इति (२) । (छिन्नः क्लिष्टोभवसंक्रमो यस्यासविच्छेदाज्जनिजा म्रियते" स्मृत्वाच पुनर्जायत इति) अत्रच "ते मय्येवाखिल चाशय" (३) इति पूर्वश्लोकेन सङ्गत

---

(१) ब्रह्मातिरिक्त वस्तुनोऽभावार्थात् मायातु ब्रह्मण्येव । रज्जुरिति यथा रज्ज्वामहं सर्पइति ज्ञानं नाहं सर्प इति ज्ञानेनोत्तर कालीनेन बाधकेन बाध्यस्य पूर्वज्ञान आरोपितत्वं तद्वत् इति ।

(२) पातञ्जलदर्शन-भाष्यम् ।२।११।२२।१२ सूत्रम् ।

(३) भागवतम् ।१।५।२४ श्लोकः ।

संकीर्त्यमानं मुनिभिर्महात्मभि-
र्भक्तिः प्रवृत्तात्मरजस्तमोघ्नी ॥३॥

चापल त्यागादाक्षा शमःस्थायी उक्तः। सुख (क्ति) सङ्गः अद्या जया अवणहेतुप्रदीपन विभावाः भगवाजास्मरणम्। सर्वनाशैक्य कथन मनुभावः। अस्खलिता मतिर्व्यभिचारी। एतमेव विभावानुभाव-व्यभिचारिसम्प्रयोगाद्रसः शान्तो निष्पद्यते। न च अभस्य सर्व्व चित्तवृत्त्युपरमात्मकत्वेन रत्याद्यभावरूपत्वाद्भावत्वं विप्रतिषिद्धमिति शङ्कयम् प्रशान्तवाहिताऽपवृत्तिसञ्ज्ञानेन भावत्वोपपत्तेः। प्रशान्तमेव हि चित्तं तत्तत्कारणवशाद्रति हासादिपरिणाम भवतीति रत्यादीनां मूलभूतत्वादस्य नानाभाव रूपत्वम् न हि शून्यं जनुम्। घटाभावो मृत्तिका पटाभावस्तन्तव इति। निरतिशयानन्दहेतुत्वेन चास्य रसेषु श्रेष्ठम्। यदाहुः "यच्चकाम सुखं लोके यच्च दिव्यं महत् सुखम्। तृष्णाक्षय सुखस्यैते नार्हतः षोड़शीं कलाम् (१) इति। (२) ननु "एतेहृष्टौ रसाः प्रोक्ता दुर्म्मुखेन महात्मना" इति वदतोभरतस्य शृङ्गारादावष्टरसकेरसत्वमभिप्रेतम्। तल्लक्षणे तत्क्षयमुच्यते। शमं किन्तु नाट्यविषयेऽष्टानामेव रसत्वं नान्यस्येति तस्याभिप्रायः। अतएव (३) "अष्टौ नाट्यरसाःस्मृताः" इति तेनैवोक्तम्। सर्व्वस्यैव शान्तापलाप इति तु तद्व्याख्याने "तुष्यन्ति तृष्णाः कामे मोक्षेवाप्यविरागिणः (४)। धर्म्मोधर्म्मं प्रवृत्तानां कामः कामोपसेविनाम्" इत्यादि तस्यैव वचनं विरुध्येत।

---

(१) शब्दार्थ चिन्तामणिः।

(२) भरतसूत्रेणाध्य सूत्रम्।

(३) ,,

(४) नाट्यसूत्र व्याख्यानेऽभिनवगुप्त पादाचार्यैरुक्तं।

कापिलः ।

सतां प्रसङ्गान् मम वीर्य्य संविदो
भवन्तिहृत्कर्ण रसायनाः कथाः ।

अतएवाभिनवगुप्तपादैर्महतासंग्रहेण प्रतिष्ठापितः । महाभारतादौ चास्यैव साम्राज्यम् । (१) ननु तथाप्यस्य विषय जगुप्सारूपत्वात् वीभत्सान्तर्भावोयुज्यते । इतिचेन्न । इहजगुप्सायाः सञ्चारित्वेनावस्थापितत्वात् । पर्य्यन्तनिर्व्वाहे तस्य मूलतएव विच्छेदात् । यत्रतु वीभत्सो नो विरज्यते । तत्र वीभत्सएव यथा "लालं वक्त्रासवंवेत्ति मांसपिण्डोपयोधरौ । मांसास्थिपिण्डेजघने जनः कामग्रहातुरः ।" तथा उत्तानोच्छून मण्डूक पाटितोदर सन्निभे । क्लेदिनि स्त्रीव्रणेसक्तिरक्तमेः कस्य जायत इति । नाप्यस्य धर्म्मवीरेऽन्तर्भावः । तस्याभिमानमयत्वेन व्यवस्थानात् । अस्य चाहङ्कार प्रशमैकरूपत्वात् । तथापितयोरैकत्वं परिकल्पने वीररौद्रयोरपि तथात्व प्रसङ्गः धर्म्मवीरादीनां चित्तवृत्ति विशेषानां सर्वाकाराणां अहङ्कार रहितत्वे शान्तरसभेदत्वमिति व्यवस्थाप्यमाने न कश्चिद्विरोधः । तस्माद्वीभत्सादिभ्यः पृथग्भूत शमस्थायिभाव उत्तम प्रकृतिरहङ्कार शैथिल्यात्मकोऽस्तु शान्तनामारस इत्यनिच्छताऽप्यवश्यमभ्युपेतव्यम् । नारदोव्यासम् ॥१।५।२८। (२)

सतामित्यादि । वीर्य्यं महिमानं सम्यग्वेदयतीति वीर्य्यसम्विदः "वान्तिपर्णशुषोवाता" इति वदन्तर्भावितनिजर्थोऽत्रविदि रसायना अमृतोभूताः । तज्जोषणात् कथाश्रवणात् अपवर्गस्य मोक्षस्य वर्त्मनि मार्गे मयिसाकारे प्रथमं श्रद्धा प्रसन्नचित्तम् । ततोरति-

---

(१) भरतसूत्रेणाद्य सूत्रव्याख्याता अभिनवगुप्तपादाचार्यः, तेन तदभाषि ।
केषाञ्चिन्मते नाट्यसूत्र प्रणेता दुष्मन्तराजसभय भरत इति ।
नैव भरतमुनिरन्यः ।

तच्छोषणादाश्वपवर्ग वर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥४॥
भक्त्यापुमान् जात विराग ऐन्द्रियाद्
दृष्टश्रुतान्मद्रचनानुचिन्तया ।
चित्तस्य यत्तो ग्रहणे योगयुक्तो-
यतिष्यते ऋजुभिर्योग मार्गैः ॥५॥
पुंसां किलैकान्तधियां स्वकानां
याःसम्मदो दिविभूमौ रसायाम् ।
नराति यद्देश (ष) उद्वेग आधि-
र्मंदःकलिर्ध्वंसनं सम्प्रयासः ॥६॥

रासक्तिः । ततोभक्तिःपरमप्रेमात्मिका । यत्लाभेन ब्रह्मादिपदान्यपि हेयायमन्यत इत्यनुक्रमः ॥३।२५।२५ (४)

तदेवाह । भक्त्येत्यादि । ऐन्द्रियं इन्द्रियजन्यं सुखम् । दृष्टं ऐहिकं श्रुतंपारलौकिकं । ममरचनायाःसर्गविसर्गादेः अनुचिन्ता यस्यां भक्तौ । ऋजुभिर्योगमार्गैर्यमादिभिश्चित्तस्य वशीकरणे यत्तः सावधानः सन् यतिष्यते । ततो योगयुक्तः समाधिसम्पन्नोभवतीत्यर्थः । कपिलो देवहूतिम् ॥३।२५।२६ (५)

पुंसामित्यादि एकस्मिन्नीश्वरेअन्तोबन्धनं यस्याः साधीर्येषां ते तथा । (१) इतिबन्धने इतिभ्वादौ । भगवन्निष्ठानामित्यर्थः । रसाः पातालान्ताः तेषां नराति न ददाति । यत्र यासु सम्पत्सु स्वयोगर्वः कलिर्लेशैश्वर्यावलेपादन्येषामनादरः । उद्वेग-

---

(१) पाणिनीय धातुपाठः तान्तवर्गो दृश्यः (अतीतिबन्धे)

वैवर्गिकायासविघातमस्मत्
प्रतिविधत्ते पुरुषस्य शक्र ।
ततोऽनुमेयो भगवत् प्रसादो
यो दुर्लभोऽकिञ्चन गोचरोऽन्यैः ॥७॥
अहं हरे तव पादैकमूल-
दासानुदासो भविताऽस्मि भूयः ।
मनः स्मरेतासुपतेर्गुणानां-
गृणीत वाक् कर्म करोतु कायः ॥८॥

श्चिन्ताऽनवस्थितिः । आधिश्चिन्ता (१) मदोहङ्कारः । कलिर्विरोधः । व्यसनं चित्तस्यतत्परत्वम् संप्रयासः सम्यक् क्लेशः ॥६। १।२२ (६)

तदेवाह । वैवर्गिकेति । विवर्गः प्रयोजनं यस्यायासस्य । तस्य विधानं । अस्मत्पतिर्विष्णुः हे शक्र ततोविघातात् । अन्यैर्दुर्मायासत्तैः ॥६।११।२३। (७)

तस्मात्स्मयादिदुष्टत्वात् सम्पदस्त्यक्त्वा भगवदास्यमभ्यर्थय इत्याह अहमित्यादि । तवपादएकोमूलमाश्रयो येषां दासानामनुदासो भविताऽस्मि भविष्यामि । भूयः पुनः प्राक् एकवारं . चित्रकेतुत्वेन भूतत्वात् । असुपतेः प्राणाधिष्ठातुः । कर्म तद्गृह मार्ज्जनादि । आद्या कर्मणि षष्ठी । अन्या अस्वन्ये ॥६।११।२४ (८)

---

(१) 'आधिर्व्यसन' मिति मेदिनी आधिर्मानसी व्यथा इत्यमरः ।

न नाकपृष्ठं नच पारमेष्ठ्यम्,
नसार्व्वभौमं न रसाधिपत्यम् ।
न योगसिद्धिरपुनर्भवं वा,
समञ्जसत्वाविरहय्यकाङ्क्षे ॥९॥
अजातपक्षादुव मातरं खगाः
स्तन्यं यथा वत्सतराःक्षुधार्त्ताः ।
प्रियं प्रियेव व्युषितं विषन्ना-
मनोऽरविन्दाक्षदिदृक्षते त्वाम् ॥१०॥

ननु किंमदास्येन स्वाराज्यादिष्वन्यतमोवोयतामिति चेत्तत्राह । ननाकेति । नाकपृष्ठं ऐन्द्रं स्थानम् । सार्व्वभौमं सर्वस्याभूमेरीश्वरत्वं । पारमेष्ठ्यं ब्राह्मं पदम् । योगसिद्धिरणिमाद्याः । अपुनर्भवोमोक्षः । समञ्जसत्वमिति हेतुगर्भविशेषणम् । व्युत्क्रमनिर्देशोऽपि अर्थक्रमस्य बलीयस्त्वात् सार्व्वभौम-नाकपृष्ठ-पातालं परमैश्वर्य्यं योगसिद्धि पारमेष्ठ्या पुनर्भवेषूत्तरोत्तर प्रकर्षो विवक्षितः । अत्र च नाकपृष्ठादीनां पञ्चानां कालकलितत्वेन मोक्षस्य च नित्यत्वेन निरतिशय सुखैकरूपत्वेन तदनुभवाभावात् । असमञ्जसतयाऽनाकाङ्क्षत्वम् । त्वां काङ्क्षदित्युक्तम् । ६।११।२५ (९)

तदेव प्रपञ्चयति । अजातेति । व्युषितं दीर्घप्रवासिनम् । अजातपक्षादिभिस्त्रिभिरुपमानैर्यथोत्तरम् ज्ञानप्रकर्षात् सुषुप्ताद्यवस्थात्रयं क्रमाल्लक्षितम् । ततश्चावस्थात्रयेऽपि तां मनोदिदृक्षत इत्यर्थः । यद्वोपमात्रयेण क्रमादुत्कण्ठया मन्द-मध्य-मोत्तमरूपावस्थात्रयमुक्तम् ॥६।११।२६ (१०)

ममात्तमःश्लोकजनेषु सौख्यं-
संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्मायया त्मात्मज दारगेहे-
ष्वासक्तचित्तस्य न नाथ भूयात् ॥११॥

अक्रूरः ।

किं मया चरितं भद्रं किं तप्तं परमंतपः ।
किंवाथाप्यर्हते दत्तं यद्वक्ष्याम्यद्य केशवम् ॥१२॥
ममैतद् दुर्लभं मन्ये उत्तमः, श्लोक दर्शनम् ।
विषयात्मना यथा ब्रह्म कीर्त्तनं शूद्रजन्मनः ॥१३॥
मैवं ममाधमस्यापि स्यादेवाच्युत दर्शनम् ।
क्रियमाणः कालनद्या क्वचित्तरति कश्चनः ॥१४॥
ममाद्यामङ्गलं नष्टं फलवांस्त्वेव मेभवः ।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रि पङ्कजम्॥१५॥

ननु प्राचीनकर्म्मक्षपणार्थं त्वया तत्रैव स्थेयं कुतोमद्दर्शनमिति चेत् तथापि संसृतौ भ्रमता मयापि किञ्चिदभ्यर्थ्यमस्ति इत्याह । ममेति । हे उत्तमःश्लोक आत्मजादिष्वासक्तचित्तेषुजनेषु मे सख्यं न भूयात् । आत्मा देहः वृचो हरिम् ॥६।११।२६ (११)
किमित्यादि । अर्हते सत्पात्राय ॥१०।३८।३ (१२)
ममेति । आत्मामनः । ब्रह्म वेदः १०।३८।४ (१३)
अथवा दुर्लभमिति मैवेति ॥१०।३८।५ (१४)
मैवम् । किन्तु सुलभम् ॥१०।३८।६ (१५)

कंसोवताद्याकृत मेऽत्यनुग्रहम्,
द्रक्ष्यै ऽङ्घ्रि पद्मं प्रहितोऽमुनाहरेः।
कृतावतारस्य दुरत्ययं तमः,
पूर्व्वे ऽतरन्यन्नखमण्डलत्विषा ॥१६॥
यदर्च्चितं ब्रह्मभवादिभिःसुरैः,
श्रियाच देव्या मुनिभिः स सात्वतैः।
गोचारणायानुचरैश्चरद्वने-
यद्गोपिकानां कुच कुङ्कुमाङ्कितम् ॥१७॥

समेति कंस इति भवोजस्व। वतेति विस्मये। अमुना कंसेन प्रहितः प्रस्थापितः। ननु किमङ्घ्रिपद्मे दृष्टेऽपि तत्राह। दुरत्यय-मिति। पूर्व्वे सनन्दनादि योगिनः यस्याङ्घ्रि पद्मस्य द्वत्पद्म कर्णि-कायामर्पितस्य त्विषा तमः पञ्चपर्व्वाविद्यां (१) अतरन् तीर्णवन्तः नचेदमङ्घ्रि पद्मं मुक्तिमात्रफलम्। किन्तुचतुवर्गमपिप्रसूते इत्यभि-प्रेत्याह ॥१०।३८।७ (१६)

यदिति। यदङ्घ्रि पद्ममनुचरैर्गोपैःसह ब्रह्मादिभिरर्च्चितम्। नैजैश्वर्य्यनिर्व्वाहायेत्यर्थसिद्धिरुक्ता। श्रियेति। कामस्य मुनिभिरिति मुक्तेः सात्वतैरिति धर्म्मस्य सत्सत्त्वं विद्यते यस्मिन् ससत्त्वानुविष्णुः। सभक्तिभिर्भजनीयो येषान्ते तथा दैष्णवा इत्यर्थः। गोचारणायेति त्रिभिर्विशेषणैः पशुपामर (स्त्रिया) स्त्रादिष्वपि सानुग्रहत्वात् सुप्रसन्नत्वमुक्तम् ॥१०।३८।८ (१७)

---

(१) "अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः"। योगदर्शनं २।३ सूत्रम्।
यदाह भगवान् वार्षगणिः—अविद्या पञ्चपर्व्वेति प्रादुर्भूता महात्मनः।
इति भामती योगवार्त्तिकयोः।

द्रक्ष्यामि नूनं सुकपोल नासिकम्,
स्मितावलोकारुण कञ्जलोचनम् ।
मुखं मुकुन्दस्यगुड़ालकावृतम्,
प्रदक्षिणं मे प्रचरन्तिवैमृगाः ॥१८॥
अद्यद्य विष्णोर्मनुजत्वमीयुषो-
भारावताराय भुवोनिजेच्छया ।
लावण्य धाम्नो भवितोपलम्भनम्,
मह्यंननस्यात्फलमञ्जसादृशः ॥१९॥

द्रक्ष्यामीति । स्मित युक्त अवलोको यस्मिन् तथा अरुणिकञ्जवत् पद्मवत्लोचने यस्मिन् । पश्चादनयोः कर्मधारयः । कञ्जं पद्मम् । गुड़ावक्रा अलकाश्चूर्णकेशाः तै वक्रकेशैरावृत मित्यर्थः । कुतोनूनं तद्रक्ष्यसि तत्राह । प्रदक्षिणमिति । वै यस्माद् मृगा इत्यत्र विशेषोक्तावप्ययुग्मसंख्या गौराश्चेति ज्ञेयम् । तथाचोक्तम् शाकुनतन्त्रे (१) "पुण्येनगत्यागमयोरयुग्माः प्रदक्षिणं गौरमृगाः प्रयान्ति । समान शस्ता न च वाम याताः कृष्णैर्विमिश्रा न भवन्ति दुष्टाः" इति ॥१०।२८।९ (१८)

अद्यद्येति अपि अहो ईयुषः प्राप्तस्य भविता भविष्यति । उपलम्भनं दर्शनम् । तेन च मह्यं मम दृशः दृष्टेः फलं नस्यादिति । न किन्तु द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः स्यादेवेत्यर्थः ॥१०।२८।१० (१९)

---

(१) शाकुन तन्त्रे यात्राकाले अङ्गस्पन्दनादीशुभाशुभ निर्णायक ग्रन्थः ।
शाकुन दीपिका, वसन्तराजशाकुनम् पद्मपद्मौत्यादि । अन्यशाकुलतन्त्रं, अन्यत् हरसंहितायां छान्दोग्य ६ ३।४। ४६।७२।७३ च: ।

यईक्षिताहं रहितोऽप्यसत् सतोः-
स्वतेजसापास्त तमोभिदाभ्रमः ।
स्वमायया त्मन् रचितैस्तदीक्षया,
प्राणाक्षधीभिः सदनेष्वभीयते ॥२०॥

कोऽसौ विष्णुरितिचेत्तत्राह य इति। यः सदनेषु क्षेत्रेषु अभीयते क्षेत्रतया प्रतीयते। किम्भूतेषु क्षेत्रेषु प्राणाक्षधीभिर्विशिष्टेष्वित्यर्थः। प्रान्ति पुरयति सर्वमिति प्राणः। स्थूल सूक्ष्माणि दशभूतानि प्रातेर्णद्यादि तु प्रत्ययेरूपम्। अक्षाणि दशेन्द्रियाणि धियश्चत्वार्यन्तःकरणानि च चतुर्विंशतितत्त्वरूपेष्वित्यर्थः। तत् किं एतान्यथात्मन्नित्यानि ..... नेत्याह। आत्मनिति। अधिष्ठाने। रचितैः रचिताभिरित्यर्थः। नन्वद्वितीयत्वादसहायस्य कुतः कर्तृत्वं तत्राह स्वेति। स्वशक्ति मायाद्वारेण रचितैरित्यर्थः। तथापि मायायाजड़त्वान्नोकर्तृत्वमितिचेत्तत्राह। तदीक्षयेति "स (तद्) ऐक्षतबहुस्यां प्रजायेये" त्यादि श्रुतिप्रसिद्धेक्षादर्शनं यस्यां मायायां सा तथा। अयमर्थः। अचेतनापि माया चैतन्यच्छाया पतितमात्राद्यापिपर्त्ति। अयस्कान्तमणिसन्निधानादिवलोहम्। मायासम्बन्धानन्तरभावीदमुक्तम्। ततः प्राग्भावेरूपमाह। असत्-सतोः कार्य्यकारणयोः। ईक्षिता द्रष्टा। अहं रहितोऽपि इदमहं पश्यामीत्यभिमानहीनोऽपि अहंकाररहित्ये हेतुमाह। स्वतेजसेति। स्वेन तेजसाचित् प्रकाशेन अपास्तं दूरीकृतं तमोऽज्ञानं भिदातत्कार्य्यं विपर्ययो वा भ्रमः। तत् संस्कारः संशयोवा येन सतथा। अज्ञानादि संसर्गशून्य इत्यर्थः ॥१०।३८।११ (२०)

यस्याखिलामीवहभिःसुमङ्गलैः,
वाचोविमिश्रा गुणकर्म्म जन्मभिः ।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगत्,
यास्तद्विरक्ताः शवशोभना मताः ॥२१॥
सचावतीर्णःकिल सात्वतान्वये,
स्वसेतुपालामरवर्य्यशर्म्मकृत् ।
यशोवितन्वन् व्रज आस्तुईश्वरो-
गायन्तिदेवा यदशेषमङ्गलम् ॥२२॥
तत्त्वद्यनूनं महतां गतिं गुरुम्,
त्रैलोक्यकान्तं दृशिमन्महोत्सवम् ।
रूपं दधानं श्रियमौश्रितास्पदम्,
द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥२३॥

यस्येति । अमीवं पापं घ्नन्तीत्यमीवहानि तैः प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति । अन्तर्भावितनिजर्थात्तत्र प्राणि शुम्भतौ ... तद्विरक्ताः विष्णुगुणादिहीनाः । शवशोभनाः शवालङ्करणानि ॥१०।३८।१२ (२१)

स इति । स विष्णुः । सात्वतान्वये यदुवंशे किल प्रसिद्धौ यद् यशः अशेषाणि मङ्गलानि यस्मिन् यशसि ॥१०।३८।१३ (२२)

तमिति । गुरुमुपदेष्टारम् । गतिं प्राप्यम् । दृशिमतांविशाल-दृष्टीनाम् । महानुत्सवोयस्मादूपात् । उषसः प्रातःकालस्य सम्बन्धिनः सुप्रशस्तदर्शनाः दध्याज्यदूर्व्वादयः । उषसि मयेते दृष्टा इत्यर्थः ॥१०।३८।१४ (२३)

अथावरूढः सपदीशयोरथात्,
प्रधान पुंसोश्चरणं स्वलब्धये ।
धियाधृतं योगिभिरध्वहंसवम्,
नमस्य आम्नाञ्च खलोन् वनौकसः ॥२४॥
अथङ्घ्रिमूले पतितस्य मेविभुः,
शिरस्यधास्यन्निजहस्त पङ्कजम् ।
दत्ताभयं काल भुजङ्गरंहसा,
प्रोद्वेजितानां शरणैषिनां नृणाम् ॥२५॥
समर्हणं यत्र निधाय कौशिक-
स्तथाबलिश्चाप जगत्त्रयेन्द्रताम् ।
यद्वाविहारे व्रजयोषितांश्रमम्,
स्पर्शेनसौगन्धिक गन्धमापनुदत् ॥२६॥

अथेति । अथ दर्शनानन्तरम् । ईशौ रामकृष्णौ, प्रधान पुंसोः प्रकृतिपुरुषयोः स्वलब्धये आत्मप्राप्तये । अध्यात्मनयोः ॥ १०।३८।१५ (२४)

अधीति । अधास्यत् धास्यति । किमिति आकागच्छते ॥१०।३८। १६(२५)

समिति । यत्र हस्तपङ्कजे । कौशिक इन्द्रः । विहारोराम-क्रीड़ायां सौगन्धिकंकल्हारं तद्दृगभोयस्य तत्तथा । अपानुदद् अपाचकार ॥१०।३८।१७ (२६)

न मय्युपैष्यत्यरिबुद्धिमच्युतः,
कंसस्य दूतः प्रहितोऽपि विश्वदृक् ।
योऽन्तर्बहिश्चेतस एतदोहितम्,
क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥२७॥
अथाङ्घ्रिमूलेऽवहितं कृताञ्जलिम्,
मामोक्षिता सस्मितमार्द्रया दृशा ।
सद्यःपरिष्वज्य गतक्लिषो-
वोढा मुदं नौतविहङ्गयोर्यथा ॥२८॥
सुहृत्तमं ज्ञातिमनन्यदैवतम्,
दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथमाम् ।
आत्माहितीर्थीक्रियते तदैवमे-
वंव्रतस्य कर्मात्मक उच्छ्वसित्यतः ॥२९॥

नमयोति। उपैष्यत्। उपेष्यति। यद्यपि कंसस्यदूतः प्रहितश्च तेनैवाहम्। यतोविश्वदृक्। तदेवाह योऽन्तरिति एतस्य जनस्येहितं चेष्टाम्। अमलेन चक्षुषा प्रज्ञानदृष्ट्या ॥१०।३८।१८ (२७)

अथेति। अवहितं अङ्घ्रिमूलं विषयेकृतावधानं ईक्षिष्यते। वोढाहं भविष्यामि। वहे स्त्रोणिरूपम्। नतुलुटि वोढाऽस्मीति हितच स्यात् ॥१०।३८।१९ (२८)

सुहृत्तममिति। सुहृत्तममतिमित्रम्। ज्ञातिं सम्बन्धिनम्। अनन्यदैवतं भक्तम्। परिरप्स्यते। आलिङ्गिष्यति। आत्माशरीरम्। तीर्थाक्रियते सर्व्वपावनार्थत्वात्। कर्मात्मकोवन्धः पुण्य पापग्रन्थि उच्छ्वसिति शिथिलोभवति। अतः परिरम्भात् ॥१०।३८।२० (२९)

लब्धाङ्ग सङ्गं प्रणतं कृताञ्जलिं
मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः।
तदावयं जन्मभृतोमहीयसा
नैवाहतो यो धिगमुष्यजन्मतत् ॥३०॥
न तस्य कश्चिद्दयितः सुहृत्तमो
न चा प्रियोद्वेष्य उपेक्ष्य एव वा।
तथापि भक्तान् भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥३१॥
किञ्चाग्रजोमावनतंयदुत्तमः
स्मयन् परिष्वज्य गृहीत मञ्जलौ।

लब्धाङ्गेति। हे अक्रूर! हे तात! सद्यरुश्रवाः स्फीतकीर्त्तिः ततस्तत्कर्त्तृकं सम्भाषणमपेक्षतेत्यर्थः। जन्मभृतः श्लाघ्यजन्मानः। योहि महीयसा नाहृतः। तस्यतत्तथाविध मपि जन्म धिक्निन्दित मित्यर्थान्तरन्यासः ॥१०।३८।२१ (३०)

नन्वस्य कुतोमहीयस्त्वम्? मित्रामित्र विकल्पवत्त्वात्। अताह। न तस्येति। दयितोनिरुपाधिः स्नेहस्यास्पदं सुहृत्तमः सोपाधिकस्याप्रिय अरुचिमात्रस्य द्वेष्यः। अपकारस्यापि उपेक्ष्यः औदासीन्यस्यापि। कथन्तर्हिभक्तेषु वत्सलत्वम् तत्राह। तथेति। यथायथावत् यद्वत्। सुरद्रुम उपाश्रित एवार्थदः। तथातेन प्रकारेणायमित्यर्थः। सेवाकृतं वैषम्यं नतु। सङ्गकृतम् इति प्रागुक्तम् ॥१०।३८।२२ (३१)

गृहं प्रवेश्याप्त समस्त सत्कृतं
सम्पूज्यते कंसकृतं खबन्धुषु ॥३२॥
पदानि तस्याखिल लोकपाल-
किरीटजुष्टामलपादरेणोः ।
ददर्श गोष्ठे क्षिति कौतुकानि-
विलक्षितान्यब्जयवाङ्कुशाद्यैः ॥३३॥
तद्दर्शनाह्लाद विवृद्धसंभ्रमः
प्रेम्नोद्भरोमाश्रुकलाकुलेक्षणः ।
रथाद्वस्कन्द्य सतेष्वचेष्टत
प्रभोरमून्यङ्घ्रि रजांस्यहो इति ॥३४॥
देहं भृतामियानर्थोहित्वादम्भं भियं शुचम् ।
सन्देशाद् योहरेर्लिङ्ग दर्शन श्रवणादिभिः ॥३५॥

किञ्चेति। अग्रजो बलभद्रः। आप्तं समस्तं सत्कृतं सत्कारो येन तथा (मया) तम् ॥१०।३८।२३ (३२)

एवं मनोरथान् कुर्व्वन् व्रजं प्राप्त इत्याह। पदानीति। तस्य विष्णोः लता लताकारा रेखा ॥१०।३८।२५ (३३)

तदिति। तेषां पदानां दर्शनादाह्लादः। अवस्कन्द्य अवतीर्य्य। सः अक्रूरः तेषु पदेषु ॥१०।३८।२६ (३४)

देहमिति। देहं भृतां देहिनाम्। सन्देशाद् वार्त्ताहरादपि हरिलिङ्गदर्शनश्रवणादिभिरियान् एतावानेवार्थः फलं यत्तेपाद पूतेरजसि विलुण्ठनमित्यर्थः। शुकः ॥१०।३८।२७ (३५)

सिद्धाः ।

अयं त्वत् कथामृष्ट पीयूष नद्यां
मनो वारणः क्लेशदावाग्नि दग्धः ।
तृषार्त्तोऽवगाढोनसस्मार दावं
न निष्क्रामति ब्रह्म सम्पन्नवन्नः ॥३६॥

मुचुकुन्दः ।

भवापवर्गो भ्रमतो यदा भवे-
ज्जनस्यतर्ह्यच्युत सत् समागमः ।
सत् सङ्गमोयर्हि तदैव सद्गतौ-
परावरेशे त्वयिजायते मतिः ॥३७॥
मन्ये ममानुग्रह ईश ते कृतो-
राज्यानुबन्धापगमो यदृच्छया ।

सिद्धाः । अयमिति । कृष्टं निर्मलं मन एव वारणोगजः । क्लेशाः अविद्यादयः पञ्च अवगाढोमग्नः । दावं प्राग्जातम् । ब्रह्म सम्पन्नवत् समाधिस्थवत् । सिद्धा भगवन्तम् ॥४।७।३५ (३६)

मुचुकुन्दः । एवं शान्तरसरूपेण भक्तिरसमनुभवतः सर्व्वानर्थ निवृत्तिरर्थप्राप्तिश्च स्यादित्याशयवानभ्यर्हितत्वादर्थप्राप्तिमावदाह । भवेति । भवापवर्गः संसारनिवृत्तिः । तर्हितदा यर्हियदा परे ब्रह्माद्याः । अपरे जीवाः ॥१०।५१।५३ (३७)

अनर्थनिवृत्तिमाह । मन्य इति । ते त्वया अनुबन्धः सम्बन्धः ।

यः प्रार्थ्यते साधुभिरेकचर्य्यया
वनं विविक्षद्भि रखण्ड भूमिपै ॥३८॥

इति श्रीवोपदेव कृते मुक्ताफले विष्णुभक्तानां
शान्तरसो नाम सप्तदशोऽध्यायः ॥

यदृच्छया अकस्मात्। विविक्षद्भि वेष्टुमिच्छद्भिः। अखण्डभूमिपैः सार्व्वभौमैः। एकचर्य्यया एकाकित्वेन। मुचुकुन्दः श्रीकृष्णम् ॥१०।५१।५४ (३८)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां
शान्तरसो नाम सप्तदशोऽध्यायः ॥

———

अष्टादशोऽध्यायः ।



अद्भुतरसे औदामा ।

नूनं यतत्तन्ममदुर्भगस्य
यश्वद्दरिद्रस्य समृद्धि हेतुः ।
महाविभूतेरवलोकतोऽन्यो
नैवोपपद्येत यदुत्तमस्य ॥१॥
नन्वब्रुवाणोदिशते समक्षं
याचिष्णवे सूर्य्यपि भूरिभोजः ।

अथ दिव्यदर्शनेक्षित मनोरथावाप्तुपवन देवकुलादिगमनसभा-विमान माहेन्द्रजालातिशायि शिल्पकर्मादि विभावं नयन विस्तारा निमेषेक्षण रोमाञ्चाश्रु स्वेद साधुवाद दान हाहाकरण वेलाङ्गुलि भ्रमणाद्यनुभावं हर्षावेग जड़तादि सञ्चारिणम् चित्तविस्तारात्म-विस्मय-स्थायिभावं अद्भुतरसं प्रस्तौति । अद्भुतेति । औदामेति । नामसूलेऽप्रयुक्तमपि (१) "औदामारङ्गभङ्गार्थं भूम्यांनीतेन्द्र वैभवम्" इति पद्मपुराणस्थ महस्तनाम दृष्ट्वेहप्रयुक्तम् । नून मित्यादि । वतेति विस्मयद्योतकोनिपातः । एतन्नूनं एतत् (किं) यद् यदुत्तमस्याव लोकादन्यो मम समृद्धे र्हेतुर्नोपपद्येत न घटेतैव । विभूतिरैश्वर्यम् । अन्यस्य समृद्धि-हेतुत्वाभावे कारणमाह । दुर्भगस्येति । भगो-भाग्यम् अतएव दरिद्रः ॥१०।८०।३३ (१)

नन्वेवमृतखेदस्यावलोकस्तर्हिकिमिति विद्याभ्यासससये

---

(१) पद्मपुराणे श्रीविष्णोः सहस्रनामसु ।

पर्ज्जन्य वत्तत्स्वयमीक्षमाणो-
दाशार्हकाणा ऋषभः सखा मे ॥२॥
किञ्चित्करोत्युर्व्वपि यत् स्वदत्तं
सुहृत् कृतं फल्ग्वपि भूरिकारी ।
मयोपनीतं पृथुकैकमुष्टिं
प्रत्यग्रहीत् प्रीतियुतो महात्मा ॥३॥
तस्यैवमे सौहृदसौख्य मैवी-
दास्यं पुनर्ज्जन्मनि जन्मनि स्यात् ।

तव सम्पन्नाभूत् इत्यत् आह। नन्विति। भोजवंश्यत्वाद्भोजः (१) श्रीकृष्णः। अभूरि अल्पमपि याचिष्णवे याचमानाय। समक्षं-ददामीत्यब्रुवाणोऽर्थात् परोक्षं भूरि प्रचुरंदिशते ददाति। यथा पर्ज्जन्यः स्तोकमप्यर्थितोमहाशयतया भूर्य्येव प्रयच्छति। तथाऽयं यत् याचनं स्वयमेव याचकं प्रतीक्षमाण इत्यर्थः। दासार्हकाः क्षत्रिय विशेषाः ऋषभः श्रीकृष्णम् ॥१०।८०।३४ (२)

दृष्टान्तव्यंजितां महाशयतां एव पुनराह किञ्चिदिति। उरु वह्वपि स्वदत्तं किञ्चित्तुच्छं करोति। सुहृद्भक्त स्तत्कृतं फल्ग्वपि भूरिकारी भूरिकरिष्यामीत्येवं श्लोकः। यतो मयोपनीत मानीतं पृथुकानां चिपिटकानां एकमुष्टिं स्वीकृतवान् ॥१०।८०।३५ (३)

यस्मादयमेवंभूतस्तस्मादिदमस्तीत्याह। तस्येति। सौहृदादीनां द्वन्द्वैक्यम्। सौहृदं शरीरसम्बन्धः। सख्यं सहवासः।

---

(१) भागवतम् १०।२।१९ इत्यस्मिन् श्लोके भोजेन्द्र पदेन कंस एवोद्दिष्टः। तस्यैव तद्देशाधिपतित्वं भोजवंश्यत्वमनुभीयते। अतएव भगवतोऽपि भोजवंश्यत्वं। हरिवंशस्य गाथाभूतोभोजवंशः। हरि सात्वत भोज यदुरिति पर्य्यायः।

महानुभावेन गुणालयेन
विषज्जतस्तत् पुरुषप्रसङ्गः ॥४॥
भक्ताय चित्रा भगवान् हि सम्पदो
राज्यं विभूतीर्नसमर्थयत्यजः ।
अदीर्घ बोधाय विचक्षणः स्वयं
पश्यन् निपातं धनिनां मदोद्भवम् ॥५॥

शुकः ।

इत्थं सतां ब्रह्म सुखानुभूत्या
दास्यं गतानां परदैवतेन ।

मैत्री परस्परोपकार कर्तृत्वम् । गुणालयः प्रधानम् । महानुभावो महदादिकार्य्यरूपः प्रभावोयस्यतेन । विषज्जतः उच्चावच योनिर्गच्छतः । प्रकृतिवशात् संसरत इत्यर्थः । तत्पुरुषा वैष्णवाः ॥१०।८०।३६ (४)

ननु भक्तवत्सलस्येदयं तर्हिस्वयमेव सम्पदः किंभक्तेभ्यो न वितरतीत्यत आह भक्तायेति । सम्पदोगजतुरगादयः । राज्यं राज्ञः कर्म्म नियहादि । पाटवं विभूतिरणिमाद्यैश्वर्य्याणि । न सम्बर्द्धयति । अदीर्घबोधायापक्वज्ञानाय भक्ताय । पक्वज्ञानस्य तु इच्छैव नास्ति । यदृच्छया चागताः सम्पद स्तेनाभिभवितुं क्षमन्ते । स्वयं विचक्षणः प्राज्ञः । सम्पत्सङ्गादेवतत्त्वविमुखो माभूदिति विमर्शवत्त्वात् विचक्षणत्वम् । अत्र (अतएव) वर्तेति द्योतितो-विस्मयः । स्थायी मनोषिताऽवाप्तिविभावः । साधुवादोऽनुभावः । सञ्चारिण उग्रा एव मन्यत्र ॥१०।८०।३७। (५)

मायाश्रितानां नरदारकेण
साकं विजह्रुः कृत पुण्यपुञ्जाः ॥६॥
यत् पादपांशुर्बहुजन्म कृच्छ्रतो-
धृतात्मभिर्योगिभिरप्यलभ्यः ।
स एव यद्दृग् विषयः स्वयं स्थितः
किं वर्ण्यते दिष्टमतोव्रजौकसाम् ॥७॥
नैतद्विचित्रं मनुजार्भमायिनः
परावराणां परमस्य वेधसः ।
अघोऽपि यत् स्पर्शनधौत पातकः
प्रापात्मसाम्यं त्वसतां सुदुर्लभम् ॥८॥
सकृद्यदङ्गप्रतिमान्तराहिता
मनोमयो भागवतीं ददौगतिम् ।

इत्थमिति। गोपाः श्रीकृष्णेन सार्द्धं विजह्रुः। इत्थं अङ्ग-स्पर्शनादिभिः। सतां ब्रह्मविदाम्। ब्रह्मसुखानुभूत्या ब्रह्माख्य-सुखानुभवरूपेण। नरदारको नन्दनन्दनः ॥१०।१२।११ (६)

यदिति। बहुषु जन्मसु यत्कृच्छ्रान्तपः प्रभृतिः तेन धृतात्मभिः जितेन्द्रियैः। यत्पादपांशु र्यत्पादरजः स एव यद्दृग्विजयः। न तु पांशुःदिष्टं (अदृष्टम्) दैवं। अहो आश्चर्ये ॥१०।१२।१२ (७)

नैतदिति। एतद्गोपैः सहक्रीडनम्। मनुजार्भमायिनः मनुष्यबालरूपाः मायाः स्वीकृतवन्तः। परावराणां कारणं कार्य्याणां। वेधसः कर्त्तुः। परमस्य कर्त्रन्तररहितस्य। अघो अघासुरः सामामित्येवोक्ते सारूप्यंस्यादत उक्तं आत्मेति ॥१०।१२।३८ (८)

स एव नित्यात्म सुखानुभूत्यभि-
व्युदस्तमायोऽन्तर्गतो हि किंपुनः ॥९॥

ब्रह्मा ।

तद्दस्तुमे नाथ स भूरिभागो
भवेऽत्र वान्यत्र तु वातिरश्चाम् ।
येनाह मेकोऽपि भवज्जनानां
भूत्वानिषेवे तव पादपल्लवम् ॥१०॥
अहोऽतिधन्या व्रजगोरमण्यः
स्तन्यामृतं पीतमतीव ते मुदा ।

सङ्गदिति । यदङ्ग प्रतिमा यत् स्वरूप प्रकृतिः । भागवतीं-स्थितिं ददाति । स एव साक्षात् दृष्टो ददातीति किंपुनः अन्तर्हृदये आहिता निश्चिता । मनोमय्यपि मनः परिणाम रूपापि । नित्यस्यात्मसुखस्यानुभूत्या अभितोव्युदस्ता यया पुनर्नोदिति । तथा हिंसिता माया येन स तथा । अत्र च गोपानामलौकिकेन भगवता-सह विहारिणाघासुरस्य भगवत्सायुज्येन विभावेन जातविस्मयः । शुकेनानुभूतस्तत् साधुवाद स्वात्मानुभावः । शुकः ॥१०।१२।३८ (९)

तदिति । तत् तस्मात् यस्मादभक्त्या सुलभत्वं (स्वम्) भूरिभागो बहुभाग्यः भवोजन्म । अत्र गोकुले येन भवेन तिरश्चां तिर्यग् जातीयानां भवज्जनानां मध्ये अहमप्येकोभूत्वा तव पाद-पल्लवम् निषेवे ॥१०।१४।३० (१०)

अहोदिति । रमण्यो गोप्यः । गवां वत्सरूपेण रमणीनामात्म-रूपेण यस्य तव स्तन्ये अप्यरा अद्यापिनालं समर्थाः ॥१०।१४।३१(११)

यासां विभो वत्सतरात्मजात्मना
यत्तत्पयेऽद्यापि न चालभध्वराः ॥११॥
अहो भाग्यमहोभाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णब्रह्मसनातनम् ॥१२॥
एषान्तु भाग्यमहिमाच्युत तावदास्ता
मेकादशैव हि वयं बतभूरिभागाः ।
एतद्धृषीकचषकै रसकृत्पिबामः
शर्वादयोऽङ्घ्र्यब्जमधवमृतासवं ते ॥१३॥
तद्भूरिभाग्यमिह जन्मकिमप्यटव्यां
यद्गोकुलेऽपि कतमांघ्रिरजोऽभिषेकं ।

अहो इत्यादि वोप्सा आदरार्थः । यत् येषां पूर्णंव्यापकम् ॥ १०।१४।३२ (१२)

एषामिति । एषां व्रजौकसां । महिमामहत्त्वम् । शर्व्वादयोवयम् । बत आश्चर्य्यं । भूरिभागाः बहुभाग्याः । शर्व्वोरुद्रः । कुतो भूरिभागाः । हि यस्मात् वयं एकादश साहङ्कारेन्द्रिय देवताः। तास्च "दिग्वातार्क प्रचेतोऽश्वि वह्नीन्द्रोपेन्द्रमित्रकाः" । अहङ्कारोरुद्रः । एतद्धृषीकचषकैः एषामिन्द्रियैरेवपानपात्रैः । असकृत्सदा अङ्घ्र्यब्जं मधु, अङ्घ्रिकमलं मकरन्दएवामृतं निर्वृतिहेतुत्वात् । आसवोमद्यं अवस्थान्तरजनकत्वात् ॥१०।१४।३३ (१३)

तदिति । इहाटव्यांयत्किमपि तर्व्वादिरूपेण जन्म तद् भूरिभाग्यम् । किम्भूतं यत्कतमस्य किंजातीयस्य कस्यापि गोकुलवासिनः । अङ्घ्रिरजसोऽभिषेको यस्मिन् तर्व्वादिजन्मनि । किम्भूतः

यज्जीवितन्तु निखिलं भगवान् मुकुन्द-
स्त्वद्यापि यत् पदरजः श्रुतिमृग्यमेव ॥१४॥
एषां घोषनिवासिनामुतभवान् किन्देव रातेति नः,
चेतो विश्वफलात् फलं तदपरं कुत्रापि यत्तं मुह्यति ।
सद्वेषादिव पूतनापि सकुलात्त्वामेव देवापिता,
यद्वामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥१५॥

कतमः यस्य जीवितं मुकुन्दः । जीवितवन्मुकुन्दीयस्य प्रियतमः इत्यर्थः । किम्भूतोमुकुन्दः यस्य पादरजः श्रुतिभिर्वेदैर्मृग्यमेव । अत्रैवशब्दोहि सन्दिग्धार्थवाचि एव शब्दान्न तु कदाऽगितमित्यर्थः ॥ १०।१४।३४ (१४)

एषामिति । उत अहो । देवघोषे गोकुले । किं फलं एतद्दास्यत्यस्मिन्नर्थे । अस्माकं चेतोमुह्यति । यतोविश्वस्य फलभूतात् त्वदृमवतः सकाशादपरं फलम् अयत् (न) गत्यर्थानां धातूनां ज्ञानार्थत्वादजानदित्यर्थः । इनः शतरिरूपम् । आत्मानमेवदास्यामीति चेत्तत्राह । सदिति । सतः प्रशस्तात् सम्पूर्णात् द्वेषात् विरोधादिति यावत् । एवशब्दोऽप्यर्थे । पूतनात्वामेवापिता प्राप्ता अपिः चुरादौ (दिः) । भादौपठ्यमानोहिसेट् (धातुः) किं एकाकिन्येव प्राप्ता नेत्याह । अपि सकुलेति । कुलंवकोऽघासुरश्च येषां घोषनिवासिनाम् । धामाद्यास्त्वत्कृते त्वदर्थम् । धामगृहम् अर्थः पश्वादि । ततः सुहृत् पिताऽनेन माताऽप्युपलक्षिता । आत्माजीवः प्राणा इन्द्रियाणि प्रान्तोतिव्युत्पत्त्या । आशया अन्तः-करणानि । य एवात्मादिपक्षो दीयते स एवानुरक्तेभ्यो दीयत इत्यनुचितमित्यर्थः ॥१०।१४।३५ (१५)

तावद्रागादयःस्तेना स्तावत् कारागृहं गृहम् ।
तावन्मोहोऽङ्घ्रिनिगड़ो यावत् कृष्ण न ते जनाः ॥१६॥

उद्धवः ।

एताः परं तनुभृतो भुवि गोपवध्वो,
गोविन्द एव निखिलात्मनि रूढ़भावाः ।
वाञ्छन्ति यत् भवभियो मुनयो वयञ्च
किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥१७॥
क्ष्मा: स्त्रियो वनचरोर्व्यभिचारदुष्टाः
कृष्णे क्वचैष परमात्मनि रूढ़भावः ।

तावदिति । रागादीनां स्तेनत्वादिकं तावदेव । यावत् त्वत्-कथा नास्ति प्रवृत्तायां कथायान्तु तन्नास्तीत्यर्थं कारागृहं बन्धन स्थानम् । ब्रह्मा ओङ्कारम् । अब्राह्मणहेतुः यावत् ॥१०।१४।३६ (१६)

एता इति । परं केवलं भुवि एतास्तनुभृतो नान्ये शरीरधारणा मासामेव सुफलमित्यर्थं यतो गोविन्द एव रूढ़भावाः । मुनयोवाचं यमत्वादिगुणयुक्ताः । वाञ्छन्ति परं न सहसा प्राप्नुवन्ति । भवभियः संसारभीरवः । वयञ्चमुनयोऽपि दास्यमात्रनिष्ठाः । तत् मुनीनां ब्राह्मणत्वादिना युज्यते रूढ़भावो नतु तद्रहितस्य तव गोपीनां चेत्यत आह किमिति । ब्रह्मजन्मभिर्ब्राह्मणजातिभिः । बहुवचनेन वेदा (वृत्त्य.)ध्ययनादि ब्राह्मण गुणैरपि किमित्युक्तम् । नान्नि-होत्रादिरहितो विप्रादिरेवाधिकारी किन्तु सर्व्वेऽपीति भावः अत-एवोक्तम् "नालं द्विजत्वं देवत्व" मित्यादि ॥१०।४७।५८ (१७)

तदेवाह क्ष्मा इति । नन्वहो अनुवृत्त्या भजत अविदुषोऽपि

नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षात्
श्रेयस्तनोत्यगदराज इवोपयुक्तः ॥१८॥
नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद् व्रजवल्लवीनाम् ॥१९॥
आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम्।
यादुस्त्यजं स्वजनमार्यपथञ्च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥२०॥

प्रभावमजानतोऽपि गतानुगतिकया सेवमानस्यापि साक्षाच्छ्रेयः कैवल्यम्। यथाह्यगदराजो रस रसायनादिरूपयुक्तो गृहीतः सद्यविदुषोऽपि श्रेयः पुष्टारोग्यादि तनोति। तथैवायं वस्तुशक्तिरेवेदृशीतिभावः ॥१०।४७।५८ (१८)

नायमिति। उरसि नितान्तमत्यर्थम्। रतिः रमणं यस्याः। श्रियः व्यतिरिक्तस्य स्मरणात् संहिताः। नलिनवद्गन्धः परिमलोरुचिः कान्तिश्च यासां पद्मिनीनामित्यर्थः। रासोत्सवे रासक्रीडायाम्(इत्यर्थः) अस्य श्रीकृष्णस्य यः प्रसादो व्रजवल्लवीनां गोपीनामुदगादुदितः। भुजदण्डैर्गृहीता आश्लिष्टाः कण्ठायासां अतएव लब्धाशिषः प्राप्त मनोरथ फलाः ॥१०।४७।६० (१९)

आत्मनो गोपीतुल्यत्वं दुर्लभं मत्वा तत्पादरजः सम्यक् मध्याशास्ते। आसामिति। गुल्मादीनां मध्ये किमपिस्यां भवेयमिति

यावै श्रियार्चितमजादिभिराप्तकामै-
र्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतश्चरणारविन्दं
न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥२१॥
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनातिभुवनत्रयम् ॥२२॥

प्रह्लादः ।

नेमं विरिञ्चो लभते प्रसादं
नश्रीर्नशर्वः किमुता परेऽन्ये ।
यन्नोऽसुराणामसि दुर्गपालो
विश्वाभिवन्द्यै रभिवन्दिताङ्घ्रिः ॥२३॥

प्रार्थनायांलिङ् । गुल्मादयो हि गोपीनां चरणरेणून्जुषन्ते । अहमपि तथा भविष्यामीत्यर्थः । गुल्मः स्तम्बः । याः गोप्यः । आर्यपथं साधुमार्गम् ॥ १०।४७।६१ (२०)

अजो ब्रह्मा आत्मनिवृद्धितत्वे योगेश्वरैरर्चितं ध्यातमित्यर्थः । चरणारविन्दस्य कामनार्थं मोक्षदात्रत्वमश्नोति क्रमात् श्रियादिभिस्तृतीयान्तैरुक्तम् । आप्तकामा अपि प्राप्तैश्वर्यस्य निर्व्वाहार्थं भजन्ते । तत्तथाविधं स्तनेषु न्यस्तं संलग्नं यथास्यात्तथा परिरभ्य गाढ़मालिङ्गेत्यर्थः ॥१०।४७।६२ (२१)

किं बहुनेद मत्र युक्तमित्याह वन्द इति । अभीक्ष्णशः वारंवारम् । उद्गीतं (थं) उद्गानम् ॥ १०।४७।६३ (२२)

नेममिति । ते तव प्रसादं अपरे इन्द्रादयः । विरिञ्चादिभि-

यत् पादरङ्गमकरन्द निषेवणेन
ब्रह्मादयः शरणदाश्नुवते विभूतीः ।
कस्माद्वयं कुहृतवः खलयोनयस्ते
दाक्षिण्य दृष्टि पदवीं भवतः प्रणीताः ॥२४॥
चित्रंतवेहित मिहोऽमित योगमाया-
लीलाविहृष्ट भुवनस्य विशारदस्य ।
सर्व्वात्मनः समदृशो विषमः स्वभावो
भक्तप्रियोयदसि कल्पतरुस्वभावः ॥२५॥

स्विभिः ग्रथमाल्लेः पुत्र मित्र कलत्रेषु अपि तेनैवंविधं प्रसाद इत्युक्तम् ॥ ८।२३।६ (२३)

विश्वामि (सि) वल्ग्वतामिवाह यत्पादेति। हे शरणद। अश्नुवते प्राप्नुवन्ति । वभुतीरैश्वर्य्याणि । खलयोनयः कुजन्मानः । कुहृतयो दुराचाराः । एवं भूता अपि वयं ते त्वया ॥ ८।२३।७ (२४)

चित्रमिति । अहोदेव एतत्तवेहितं चेष्टितं चित्रं यत् समदृशोऽपि तव विषमः स्वभावः । कुतः समदृक्त्वम् यतः सर्वात्मा । तदेव कुतः यतोऽमितत्वत्त्वत्तो भेदादिभिरणिरुक्ता यायोगमाया तया लीलार्थम् क्रीड़ार्थं विहृष्टं भुवनं एव येन सतथा । तव मायया-ऽभिभूतत्वात् वैषम्य माचरसि (जीवा यथाभिभूता आचरन्ति तथा नच मायया) यतो विशारदः अविप्लुत (लुप्त) ज्ञानः । किन्त-द्वैषम्यम् ? यत् सर्व्वमयत्वेऽपि भक्तेषु प्रीतिर्न चैतद्दोषाय यतः कल्प-

अक्रूरः ।

अद्येशनो वसतयः खलुभूरि भागाः
यः सर्व्वदेव पितृभूत नृदेवमूर्त्तिः ।
यत् पादशौच सलिलं त्रिजगत् पुणाति
स त्वं जगद्गुरुरधोक्षज यां प्रविष्टः ॥२६॥
कः पण्डितस्त्वदपरं शरणं समीयाद्
भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्व्वान् ददाति सुहृदो भजतोऽभिकामा-
नात्मानमप्युपचयापचयौ न यस्य ॥२७॥

तरुखभात्रः त्वं खलु सेवकस्यैव (कस्यैव) फलं ददानोऽपि न विषमः । प्रह्लादो भगवन्तम् ॥८।२३।८ (२५)

अद्येति । हे ईश ! अद्यनो वसतयोऽहाः । खलु निश्चितं न स्तुतिमात्रम् । नरोमनुष्यः । तव प्रवेशात् पश्च महायज्ञा निर्वाप्यो योऽस्माभिर्लब्धं । इति वेदादिभिः पञ्चभिरुक्तम् । त्रिजगत्त्रिभुवनम् । जगतोगुरुः पिता । या वसतोः ॥१०।४८।२५ (२६)

क इति । त्वत्तः (त्वद्) भगवतः सकाशात् अपरं पुरुषं शरणं रक्षकं पण्डितोभूत्वा कः समीयात् गच्छेत् न कोऽप्यित्यर्थः । त्वं हि भक्तप्रियः सेवकवत्सलः न तथान्यः न च स्नेहलोपिभूत्वा सेवातारतम्यं नवेत्ति । यतः कृतज्ञः । न च कृतज्ञोऽपि प्रतिश्रुतं न प्रयच्छति । यत ऋतगीः सत्यवाक् । न च कलुषितेन मनसा ददासि । यतः सुहृत् । नचासद्ग्रहः यतो भवान् सुहृदः शुद्धहृदयस्य भजतः सर्व्वान् कामान् ददाति (सा) आत्मानञ्च यस्यात्मनः उपचयापचयौ वृद्धिनाशौ नस्तः तं कूटस्थमित्यर्थः ॥१०।४८।२६ (२७)

दिष्ट्या जनार्दन भवानिह नः प्रतीतो
योगेश्वरैरपि दुरापगतिः सुरेशैः ।
चिन्त्यागु नः सुत कलत्र धनाप्तगेह-
देहादिमोहरशनां भवदीय मायाम् ॥२८॥

शुकः ।

नैवम्बिधः पुरुषकार उरुक्रमस्य
पुंसां तदङ्घ्रिरजसाजितषड्गुणानाम् ।
चित्रं विदूर विगतः सकृदाददीत
यन्नामधेयमधुना सजहाति बन्धम् ॥२९॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
अद्भुतरसोनामाष्टादशोध्यायः ॥

दिष्ट्येति दिष्ट्यादेवेन इह जन्मिनः । अस्मान् प्रति इतः आगतः प्रकटीभूत इत्यर्थः । कूतोदिष्ट्या यतो योगेश्वरैरपि सुरेशैरपि दूरापगतिः । समाधि सम्पन्नै देवैरपि दुर्व्विज्ञातः कावार्त्ताऽन्येषाम् आशु शीघ्रं । जन्मान्तरे सुतादि मोह एव रसनारज्जुः । तां साहि भवदीया माया त्वदायत्ता । त्वञ्च जनार्दनः । जनसुत्पत्तिं आर्हयसि मोचयसि मोचद इत्यर्थः । जनेऽर्घञ् "जनिबध्योश्चेत्यहृद्भिः ॥१०।४८।२७ (२८)

अक्रूरः भगवन्तम् ।

एवम्भूतरसेन भजतो वैराग्यादिगुणा भवन्तीत्याह । नैवमिति ।

उरुक्रमस्य सम्बन्धिनां पुंसाम्। प्रियव्रतादिनामेवम्विधोरुजन्मां अपि दिनत्वकरणादिः पुरुषकारः सामर्थ्यं न चित्रं जिताः षण्णामिन्द्रियाणां गुणाः विषयाः शब्दादयो यैस्ते तथा। कुतो न चित्रम्। यतो यस्य उरुक्रमस्य नामधेयम्। यः सकृददीत। स विदूर विगतो जात्यपकर्षं प्राप्तः। अन्त्यजोऽपि स्वस्यान्येषां वन्द्यं (वान्धवम्) अधुना कलिकालेऽपि किंपुनः कृतादौ जहातीत्यस्य चित्रतमत्वात् न पूर्व्वस्य चित्रत्वमिति भावः। शुकः ॥५।१।३५ (२९)

इति हेमाद्रिकृतायां कैवल्यदीपिकायां विष्णुभक्तानाम्
अद्भुतरसोनामाष्टदशोऽध्यायः।

ऊनविंशोऽध्यायः ।



वीररसे बलिः ।

मनस्विनः कारुणिकस्य शोभनं
यदर्थि कामोपनयेन दुर्गतिः ।
कुतः पुनर्ब्रह्मविदां मवादृशां
ततो वटोरस्य ददामि वाञ्छितम् ॥१॥

एवं हास्यादि भङ्गि भिन्न भक्तिरसानुभवावच्छेदादष्टौ भक्तान् अभिधाय सम्प्रति नवमं भक्तमभिधातु मुत्साहस्थायिनं प्रति नायक-वर्त्तिनयविनया सम्मोहाध्यवसाय बलशक्ति प्रताप-प्रभाव विक्रमा-धिक्षेपादि विभावं स्थैर्य्य धैर्य्य-शौर्य्य-गाम्भीर्य्य आग वैशारद्याद्यनुभावं धृति स्मृत्यौग्रगर्व्वामर्षमत्यावेग-हर्षादि सञ्चारिणं महेन्द्र दैवतं गौरदेहं सत्त्व प्रधानं वीररसमारभते । वीरेति । नरादि लक्षणं तु अभिनव गुप्तापादौ (१) । स च वीरस्त्रेधा युद्ध-दान-धर्म्म-भेदात् । तत्र युद्धवीरोयथा "एतां पश्यपुरस्थलो मिहकिल क्रीड़ा-किरातो हरः, कोदण्डेण किरीटिना सरभसं चूड़ान्तरे ताड़ितः । इत्याकर्ण्य कथाङ्गुतं हिमनिधावद्रो सुभद्रायते । मन्दं मन्द मकारि येन निजयोर्दोर्दण्डयोर्मण्डनम् ।" दानवीरोद्वेधा । यत्र स्थिता एव सकल सम्पदः कीर्त्याद्यनुसन्धानेन स्वयमर्थिसात्क्रियन्ते । स एकः । यथा "दधिक्षीर घृताम्भोधि व्यञ्जने स्नुहनोयया । महा-

---

(१) भरतमुनेर्नाट्य शास्त्रीयव्याख्यानेऽभिनवगुप्तपादाः ।

दानोत्सवे यस्य हन्तकारायितं भुवा"। य एतु परितुष्टे दिवादिभि दीयमानाः साम्राज्यादि विभूतयः। सत्व प्रकर्षात् परिक्ष्यिन्ते स उप (रि) स्थित परिहार नामा द्वितीयः। यथा सन्तुष्टेतिसृणां पुरामपिरिपौ कण्डूलदोर्मण्डलम्। क्रीड़ाक्रान्तः पुनः प्ररूढ़शिरसो वीरस्य लिप्सोर्व्वरान्। याच्चादैन्यपरान्वित यस्य कलहायन्ते भियस्त्वंत्वण। त्वं द्वखित्यभितोमुखानि सदृश ग्रीवः कथंवर्ण्यते।" धर्म्मवीरोऽपिधर्म्मस्य सकाम निष्काम भेदात् द्वेधा। यथा "अजित्वा सार्ण्वामुर्व्वीं मनिष्टा विविधैर्मखैः। अदत्वाचार्थमर्थिभ्योभवेयं पार्थिवः कथम्। इत्यत्रमखैरनिष्टे ति। यत्तु राज्ञा वीरस्य दया-वीराख्यमपरं भेदं ब्रुवता (१) "सत्वं मदीयेन शरीरवृत्तिं, देहेन निर्व्वर्त्तयितुं प्रसीद। दिनावसानोत्सुकवालवत्सा, विमुच्यतां धेनुरियं महर्षे" इत्युदाहृतम्। तत्तु न सम्यक् तत्र हि वस्त्वन्तर-वद्देहस्यापि देयत्वेन प्रसङ्गनाद्दानवीर एवायं। अतएवायं प्रकारो दानवीर एवान्यैरुपदर्शितः। यथा "कर्णस्त्वङ्गं शिविर्मांसं जीवं जीमूतवाहनः। ददौदधीचिरस्थीनि किमदेयं महात्मना" मिति। दयायाः कृपात्वेन करुणात्वात्। करुण प्रभेद एवाय मित्येके। तस्मादस्योक्तं भेद त्रयं एवरत्यम्। अतएवेदं सावधारणमुक्तं भरतेन। "दानवीरं धर्म्मवीरं युद्धवीरं तथैवच। रसवीरमपि प्राह ब्रह्मा त्रिविध मेवहीति (२) युद्धवीरे ("आपत्पङ्कनिमग्नानां खल्प सन्तोष मिष्टा ज्ञानं च यस्य।" य (स) स्तत्त्वनिश्चयरूपोऽसंमोहा-ध्यवसायः स एव प्रधानतयोत्साह हेतुः। रौद्रे तु ममता प्राधान्या दशास्त्रान्वितानुचितयुद्धाद्यपीति मोहविस्मय (प्राधान्य) मिति तयोर्व्विविक्तः पन्थाः। मनस्विन इति। तदेवम्भूतान् वीर प्रभेदान्

(१) रघुवंशे द्वितीय सर्गे ४५ श्लोकः।

(२) विश्वनाथीय दर्पणे वीराणां लक्षणानि सलि ३।२२४।

यजन्ति यज्ञं क्रतुभिर्यमाहृता
भवन्त आम्नाय विधान कोविदाः।
स एव विष्णुर्वरदोस्तु वा परो
दास्याम्यमुष्मै क्षितिमीप्सितां मुने ! ॥२॥

मनसिकृत्वा तत्र युद्धवीररूपेण भक्तिरसानुभवमश्नुवं मन्यमानो दानवीरं दर्शयन् तस्य प्रथममेदे वलिं भक्तमाह। वलिरिति। अर्थिनां कुयाचकानां कामोऽभिलाषः। तस्योपनयेन पूरणेन या दुर्गतिः दारिद्र्यम् तदपि शोभनं श्लाघ्यं। अर्थीति कुत्सायामिनिः यदाहुः "भूमनिन्दा प्रशंसायां नित्ययोगेऽतिशायने। संसर्गेऽस्ति विवक्षायां भवन्तिमतुवादयः" इति। कारुणिकस्य परदुःखेन व्यथितस्य। मनस्विनः धीरस्य। महान्तमर्थराशिं दत्वाप्यनुशयहीनस्येत्यर्थः। यदर्थिमात्रस्यापि कामपूरणेन दुर्गतिः श्लाघ्यते तदाकिमु वेदविदामित्याह। कुतः पुनरिति। भवादृशामित्यनेन त्वत्तुल्योयंवटुरिति उक्तम्। ततोदारित्यस्य श्लाघ्यत्वादस्य वटोर्वामनस्य वाञ्छितं पदत्रयम् ॥ ८।२०।१०। (१)

नायमर्थी किन्तु वटुवेषच्छन्नो विष्णुरिति चेत्तत्राह। यजन्तीति। क्रतवः प्रसिद्धाः ज्योतिष्टोमादयः। ससोमा यज्ञाः पाकयज्ञादयः प्रसिद्धाः। निःसोमाइतिहि (१) क्रतुयज्ञेभ्यश्चेति सूत्रवृत्तिकारादिभिर्विवृतम्। भवन्तो भवादृशाः। आम्नायस्यविधाने इतिकर्त्तव्यतायां। को विदाः वरं श्रेष्ठं ददातीति वरद उपकर्त्ताऽपरोऽपकर्त्ता हे मुने शुक्र ! अत्रवलेर्ददामीत्यसंभावनाध्यवसायी ब्रह्मविदामित्युपलक्षितः। पात्रगुणाश्चमनस्वितया सूचितास्यात्साऽस्य विभावाः दुर्गतावति श्लाघ्यत्वबुद्धिरित्युपलक्षिताः। धैर्य्यादयोऽनुभावाः। एवमिति हर्षादिकाः सञ्चारिणो ज्ञेयाः। वलिः शुक्रम् ॥८।२०।११ (२)

(१) यावद्धि: ४।३।६८ सूत्रम्।

पृथः ।

वरान् विभो त्वद्वरदेश्वराद्बुधः
कथं वृणीते गुण विक्रियात्मनाम् ।
ये नारकाणामपि सन्ति देहिनां
तानीश कैवल्यपते वृणे नच ॥३॥
न कामये नाथ तदप्यहं क्वचित्
न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो
विधत्स्व कर्णायुतमेष मेवरः ॥४॥

वरानिति द्वितीयेऽस्मिन् दानवीर प्रभेदे पृथुर्भक्तः इत्यभिप्रेत्याह पृथुरिति। (१) "वरञ्च मत्तश्चन मानवेन्द्र) वृणोष्वतेहं गुणशील यन्वित" इति भगवदुक्तिं निशम्याह वरानिति। गुणविक्रियात्मनां गुणविकाररूपाणां ब्रह्मादीनां वरान् वरदेश्वरतयात्वत्तः कथं वृणीते। ब्रह्मपदादीणां विषय सुखात्मकत्वात्। विषय सुखानि च नारकानां नरक निवासिनामपि सन्ति। अतस्तान् ब्रह्मपदादिरूपान् वरान् नैव वृणेऽहम् यत स्त्वमीशः समर्थः। कैवल्यपतिश्च कैवल्यञ्च-तवाधीनम्। तर्हि कैवल्य मेववृणीष्वेति चेत्तत्राह ॥४।२०।२३ (२)

न कामये इति। तदपि न कामये यत्र कैवल्ये युष्मच्चरणा-म्बुजस्यासवो मकरन्दः। क्वचिदेकदेशेऽपि नास्ति भक्ति सुखं नास्तीत्यर्थः। सहिमहत्तमानां अन्तर्हृदय अतति सततं गच्छ-तीति महत्तमान्तर्हृदयात्। अत क्वीरूपम्। तद्हृदयान्तवर्त्ती

---

(१) श्रीमद्भागवत ४।२०।१६ श्लोकः।

स उत्तमःश्लोक महन्मुखच्युतो
भवत्पदाम्भोज सुधाकणानिलः ।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां
कुयोगिनां नो वितरत्वलं वरैः ॥५॥
यशः शिव सुश्रव आर्य्यसङ्गमे
यदृच्छया चोपशृणोति ते सकृत् ।
कथं गुनज्ञो विरमेद्विना पशुं
श्रीर्यत् प्रवव्रे गुणमङ्ग्वहेच्छया ॥६॥

तन्मुखच्युतं आस्वाद्यन्तेऽन्यैः अतो बहुभ्योयुगपत् तदाकर्णनार्थं करणायुत मेव मेमह्यं विधत्स्व एष एव वरः ॥४।२०।२४ (४)

मुक्ति सुखे भक्तिसुखाभावात् भक्ति सुखे मुक्तिसुखाभावो नास्तीत्याह । स उत्तमेति । सुधाकणानां अमृतविन्दुनामनिलो दूरादपि श्रवणमित्यर्थः । विस्मृतं तत्त्ववर्त्म यैः तेषां कूयोगिनामस्माकं तत्स्मृतिं वितरति स्वरूपानुभवसुखरूपां मुक्तिन्ददातीत्यर्थः । विषय सङ्गेऽपि मोक्षकामत्वात् कुयोगित्वम् । मुक्ति सुखेन सह भक्तिसुखं स्वभक्ताना मस्तीत्यर्थः ॥४।२०।२५ (५)

श्रवणस्य दुःसंपादकत्वात् सुसंपादकत्वेपि परिणति विरसत्वात् भक्तिसुखं दुर्लभमिति चेत्तत्राह यश इति । हे सुश्रवः सुकीर्त्ते । यदृच्छया गुरु शिष्यभावं विनापि उपशृणोति । उपश्रोतृतयाप्यवधारयति । (अवध्यायति) । किम्पुनः श्रोतृतयाऽसकृदारब्धारम् च शब्दस्येदर्थे पशुं विनाऽन्यः कथं विरमेत् यतो गुणज्ञः । मुक्ति सुखेऽपि गुणाः सन्तीति चेत्तत्राह । श्रीरिति । श्रीः भूतिः (भक्ति) सुख स्वामिनी यद्भक्ति सुखं प्रकर्षेण वव्रे । भक्तिगुणान् संवृद्ध्य

अथाभजेत्वाखिलपुरुषोत्तमं
गुणालयं पद्मकरेव लालसः ।
अथावयो रेक पतिस्पृधोः कलि-
र्नस्यात् कृतत्वच्चरणैकतानयोः ॥७॥
जगज्जनन्यां जगदीशवैशसं
स्यादेव यत् कर्म्मणि नः समीहितम् ।

मुक्तिगुणेष्वाधातुमिच्छया । अत्र यशसः शिवत्वात् निर्विघ्नत्वम् । सुश्रव इति निर्देशस्य सम्बोधनपरत्वेऽपि विशेषणप्रधानत्वात् शोभनत्वेन सुखग्राह्यत्वं । आर्य्यसङ्गमहेतुत्वात् सुलभत्वमुक्तम् ॥ ४।२०।२६ (६)

शतक्रतुत्वे शक्रस्य खर्व्वत्वात् विष्णुभक्तत्वे लक्ष्मीखर्व्वादोषोऽस्तीत्याह अथेति । अथशब्दः प्रश्ने । अथ कलिर्न स्यात् । अभजमिति । भजनारम्भभूतत्वाल्लट् प्रयोगः । लालस उत्कण्ठावान् । पद्मकरेति विशेषणप्रधानो निर्देशः भगवदुपायनार्थं लोलाकमलधारिणीत्यर्थः । सा यथा अभजत् । त्वं हि प्रकृत्या सर्व्वपुरुषेषु उत्तमः गुणाश्च गुणाः सौन्दर्य्यादयः । अपि अहो । अहञ्च सावावामिति विरूपत्वेऽपि त्वदादेर्मिथोद्वन्द्वे यद् यत् परं तत् स्वस्य इति वार्त्तिकादस्मच्छब्दः शिष्यते । यतः आवामेकस्मिन् वस्तौ सस्पृहौ एकपति स्पृहत्वेऽपि स्पृहायाः भिन्नप्रदेशविषयत्वेन नविरोध इति चेत् तदपि नास्तीत्याह ॥ कृतेति एकतानत्वमनन्यवृत्तित्वम् । एवं कलिविषये संशय्य स्वयमेव निश्चिनोति ॥ ४।२०।२७ (७)

जगदित्यादि । जगतो जनन्यां मातरि लक्ष्म्याम् । वैशसं चित्तव्यथा विशसनतुल्यत्वात् । यस्याः कर्म्मणि चरणसेवायां समीहितम् । सम्यग्वाञ्छा । ननु स्वस्यात्मकत्वं मत्वा वलवद्विरोधात् विभेषि-

करोषि फल्गूपुरुदीनवत्सलः
स एव धिष्ण्याभिरतस्य किन्तया ॥८॥
भजन्त्यथ त्वामतएव साधवो
व्युदस्त माया गुणविभ्रमोदयम् ।
भवत् पदानुस्मरणादृते सतां
निमित्तमन्यत् भगवन् न विद्महे ॥९॥
मन्ये गिरं ते जगतां विमोहिनीं
वरं वृणोष्वेति भजन्त मात्थयत् ।

चेत्तर्हि विरम्यतां अस्मादिति चेत्तत्राह । करोषीति । त्वं हि दीनेषु पक्षपातित्वात् प्रगल्भमपि सेवकं स्व संसर्गात् (स्वसर्गात्) पृथक् करोषि । श्रीरेवात्रनिदर्शनमिति भावः । तथापि तस्याः प्रेममात्रत्वे नात्यन्तं सुखसाधनत्वात् । तव च (नच) भृत्यमात्रत्वेन वहिरङ्गत्वादयुक्तः । तया सहविरोध इति चेत्तत्राह । स एवेति । स्त्रीप्रमाणेष्वन्यपुरुषेष्वेषा वार्त्ता । न तु नित्यनिरतिशयानन्दघन-ब्रह्मस्वरूपसुखसन्तुष्टे त्वयीति भावः । धिष्ण्यं पदम् ॥ ४।२०। २८ (८)

अतएव देवतान्तरं हित्वा महान्तं स्वामेव सेवन्त इत्याह । भजन्तीति अभज्याभज्य निर्द्धारणानन्तरम् । अतएवेति दीन-वत्सलत्वात् स्वरूपसुखसन्तुष्टत्वाच्च तदेवाह । व्युदस्तेति । व्युदस्तो दूरीकृतो माया गुणानां रजःप्रभृतीनां विभ्रमो विलासो हि । कार्य्यं रागद्वेषादि । तस्योदयोद्भाविर्भावो येन तम् । किमर्थं भजन्तीति चेत्तत्राह । भवत्पदेति । भवत्पदानुस्मरणमेव सतां निमित्तम् नान्यत् किञ्चित् । नित्य निरतिशयानन्दानुभवरूपत्वात् तस्येति भावः ॥ ४।२०।२९ (९)

वाचानुतन्त्र्या यर्हिते जनोऽसितः
कथं पुनः कर्म्म करोति मोहितः ॥१०॥
त्वन्मायया ऽध्वा जन ईश खण्डितो
यदन्यदाशास्त ऋतात्मनोऽबुधः ।
यथाचरेद् बालहितं पिता स्वयं
तथा त्वमेवार्हसि नः समीहितुम् ॥११॥

सनकः ।

नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किम्त्वन्यदर्पित भयं भ्रुव उन्नयस्ते ।

एवं प्रसक्तोऽनुप्रसक्त्या निरूप्य प्रकृतमनुसन्धत्ते । मन्ये गिरमिति । भजन्तं भजनादेवलब्धसद्भीत्कर्षम् । नू अहो ते तव वाचां तन्त्र्या पशुबन्धनोतुल्यया जनो यर्हसितः अबद्धः स्यात् । तर्हि कथं पुनः पुनः कर्म्मकरोति ? दृष्ट रिपवो हि तद्भजनम् विहाय ॥ ४।२०।३० (१०)

यत एवं दृष्टवाग् विलासो भवान् अतो भवता भक्तान् प्रत्येवं न वाच्यं किन्तु पितृवद्धितमेव वाच्यमित्याह । त्वन्मायययेति । अध्वा तत्त्वतः । खण्डितः पृथक्कृतः । ऋतात्मनः सन् परात्मरूपादबुधः देहेऽहं बुद्धिः सन्नान्यविषयसुखमाशास्ते वाञ्छति । अतः स्वहितं न वेत्ति । अतः स्वयमेव समीहितुं स्वहिते चेष्टयितुं भवानर्हति । सोऽयं प्रसङ्गेन भगवतादीयमाने स्वर्गापवर्गादावपि उर्ज्जस्वलत्वादनभिरुचेः पृथोरुत्साहस्थायिभावः प्रकरणेनावगम्यते । न हि क्लीवचेतसा तथाविधा वराः परिहर्त्तुं शक्याः । पृथुभंगवन्तम् । ४।२०।३१ (११)

येऽङ्गत्वदङ्घ्रि शरणा भवतः कथायाः
कीर्त्तन्य तीर्थयशसः कुशला रसज्ञाः ॥१२॥
कामं भवः स्वद्वजिनेर्निरयेषु नस्ता
चेतोऽलिवद् यदि नु ते पदयोरमेत ।
वाचश्च न स्तुलसि वद् यदि तेऽङ्घ्रिशोभाः
पूर्य्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥१३॥
नोत्तमःश्लोकवार्त्तानां जूषतां त्वत् कथामृतम् ।

नत्यन्ति केति । ये भवतः कथायां रसज्ञाः ते आत्यन्तिकमपि तव प्रसादं मोक्षाख्यं न गणयन्ति । किन्तु किमुतान्यद् ब्रह्मादि स्थानम् यतो (ते) भ्रूवउन्नयैर्भ्रूक्षेपैः कालाख्यैरर्पितभयं जनित भयं । कीर्त्यन्यं कीर्त्तनीयम् । रम्यत्वात् कृतार्थं कृत्यार्थं तवैकेन कैन्य त्वनः इति कृत्यप्रत्ययः । तीर्थं पावनत्वाद्यशोयस्य । अतएव कथा श्रवणे परिणामे च सुखदा । तदङ्घ्रि शरणत्वान्नकालभयम् ॥ कुशलत्वान्नासारग्रहणम् ॥३।१५।४८ (१२)

काममिति । कामं यथेष्टं निरयेषु भवत्वात् । अवस्थानस्तु स्वद्वजिनैरस्मत् पापे र्यदि ते पद्मवत् पदयोरलिवत् चेतोरमेत यदि तुलसीवदाचः तदङ्घ्रि सङ्गजनित शोभाः । यदि च कर्णरन्ध्रं तव गुणगणैः पूर्य्येत एवं सतिनरकोऽपि सुखदः । अन्यथा स्वर्गोऽपि दुःखद इत्यर्थः । काममित्यनेन कापिशूरता गम्यते । कुमारा भगवन्तं ॥३।१५।४८ (१३)

नोत्तम इति । उत्तमः श्लोको वार्त्ताहस्तिर्येषां ते तथा । अतएव तत् कथामृत सेवनेनैवाजरामरत्वम् । अतएवान्तकालेऽपि नोसम्भ्रमः

स्यात् समभ्रमोऽन्तकालेऽपि स्मरतां त्वत्पदाम्बुजम् ॥१४
ध्रुवः ।

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्तमहताममलाशयानाम् ।
येनाञ्जसोल्बण मुरुव्यसनं भवाब्धिं
नेष्ये भवद्गुणकथामृतपानमत्तः ॥१५॥
मैत्रेयः ।

तस्मिन् प्रसन्ने सकलाशिषां प्रभौ
किं दुर्लभं तामिरलं लवात्मभिः ।

न व्याकुलत्वं देहस्यानात्मत्वात् कुत्सित देहान्तर लाभ इति । चेत्तत्र स्मरतां तत् पदाम्बुजम् । तत् स्मरणस्यान्तकालेऽपि अलोपात् । तदुक्तं पीतासु (२) "यं यंवापीति" सूतः ॥१।१८।४ (१४)

भक्तिमिति । प्रकृष्टः सङ्गः प्रसङ्गः । भक्तत्वादिष्णु कथाश्रावक (श्रोत्र) त्वं महत्त्वादाश्रित वत्सलत्वं अमलाशयत्वाद्बोधकत्वम् । नेष्ये अतिक्रमिष्यामि ॥४।९।११ (१५)

तस्मिन्निति । तस्मिन्विष्णौ ताभिराशीभिः क्षणिकाभिः यद्यपि भक्तस्याशिषः सुलभाः तथापितानकर्त्तव्या इत्यर्थः । यतो-भजनादन्यत्र फलकामनायां दृष्टिं विहाय भजतां स्वयमप्रार्थित एव स्वगतिं स्वपदप्राप्तिं विधत्ते साच परा सर्व्वेभ्यः फलेभ्यः । सद्दिपरः सर्वेभ्यः फलप्रदेभ्यः । न च शुद्धां अशुद्धां वा भक्तिं न जानाति

अनन्यवृत्त्या भजतां गुहाशयं
स्वयं विधत्ते स्वगतिं परः पराम् ॥१६॥
नवैमुकुन्दस्य पदारविन्दयो
रजो जुषः तात भवादृशा जनाः ।
वाञ्छन्ति तदास्य सृतेऽर्थमात्मनो
यदृच्छया लब्धमनः समृद्धयः ॥१७॥
भक्तिं हरौ भगवतिप्रवहन्नजस्र-
मानन्दवाष्पकलया मुहुरर्द्यमानः ।
विक्लिद्यमानहृदयः पुलकाचिताङ्गो
नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥१८॥

कविः ।

शृण्वन् शुभद्राणि रथाङ्गपाणे

यतोगुहाशयः । सर्व्वान्तःकरणस्य । मैत्रेयो विदुरम् ॥३।१३।४८ (१६)

नवैदृति । रजोरेणुः भवादृशा विदुरादयः । आत्मनोऽर्थं आत्मनः सुख साधनं ते दास्यन्ति विष्णुदास्यं मनः समृद्धीनां मनसः सुख साधनानां यदृच्छयालब्धत्वात् तान् (न) वाञ्छन्ति । निर्म्मनस्कात्मभोग्यं हि निर्विषयं सुखं । तच्च विष्णुदास्यादेव ॥४।८।३६ (१७)

भक्तिमिति । असावहमित्यात्मानं नास्मरत् । यतोमुक्तलिङ्गः तत्रलिङ्गं शरीरंअभिमानः ॥४।१२।१८ (१८)

जन्मानि कर्म्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन्विलज्जो विचरेदसङ्गः ॥१९
एवं व्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायः

मृष्यन्निति । एवं दानवीरं दर्शयित्वा (१) क्रमप्राप्तं धर्म्मवीरं दर्शयन्नभ्यर्हितत्वात् निष्कामधर्म्मवीरमेव पञ्चदशभिःपद्यै रुदाहरति । कविरित्यादिभिः । कविः । ऋषभ पुत्रे योगी हरिश्च रथाङ्ग-चक्रम् सरथाङ्गपाणि रथो वाच्यो येषां गीतानां नाम्नाञ्च तानि तथा । नाम्नां गानं कीर्त्तनं विचरेद्विचरति । सम्भावलेलिङ् असङ्गो विलज्ज इत्याभ्यां लोकापगणनया चित्तगतं किमप्यौदार्य्यमुक्तम् । तेनचाऽस्यात्मकउत्साहोऽवगम्यते । अयमेवास्य शान्ताद्भेदः । शान्तेहिनात्यन्तं लज्जादेस्तिरस्कारः । धर्म्मस्तुभगवज्जन्माद्यनुसन्धान रूपः ॥११।२।३९ (१९)

आविर्भूत धर्म्मवीरस्यानुभावानाह । एवमिति । स्वप्रियो विष्णुः । द्रुतं भक्तिरसेनक्लिन्नम् । निरीहस्य जगज्जननाद्यघटमान मिव पश्यन् हसति रोदित्वानन्दाश्रूणि मुञ्चन्ति । रौतीति भगवन्तं पुरःस्थितमिव मन्यमानो गोष्ठीं करोते । भक्त्यावेशाद् गायति उत्तीर्णोऽस्मिभवाम्बुधिमिति नृत्यति । तत् किंनटवत्ख्यापनाय नेत्याह उन्माद वदिति । (उन्माद इत्यर्थः) । उन्माद इत्यर्थ-

व्युन्मादवन् नृत्यति लोकबाह्यः ॥२०॥
खं वायुमग्निं सलिलं महीञ्च
ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित् समुद्रांश्च हरेः शरीरं
यत्किञ्चभूतं प्रणमेदनन्यः ॥२१॥

शुकः।

योदुस्त्यान् क्षितिसुतं स्वजनार्यदारान्
प्रार्थ्यां श्रियं सुरवरैः सदयावलोकान्।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥२२॥
यज्ञाय यज्ञपतये विधिनैपुणाय
योगाय सांख्यशिरसे प्रकृतीश्वराय।

आद्यच् प्रत्ययः (१)। लोकबाह्य इत्यनेनावज्ञादिरुक्तम् ॥११।२-४० (२०)

खमिति। ज्योतींषि नक्षत्राणि। सत्त्वानि गवाश्वप्रभृतीनि। हरेः शरीरमिति बुध्या यत्किञ्चभूतं प्रणमति अनन्य सर्व्वञ्च हरि दृष्ट्वा कविः निमिम् ॥११।२।४१ (२१)

य इति। या श्रीः सुरवरैः सदयावलोकं प्रार्थ्यते तां यो भरतः नैच्छत् तद्रुचितं यतोविष्णुभक्तानां मोक्षोऽपि फल्गुः श्रीशुकः ॥५।१४।४४ (२२)

यज्ञायेति। यश्च भरतो मृगत्वं हास्यन् त्यक्ष्यन् इति समुदाजहार उच्चारितवान्। कर्म्मज्ञान—भक्तिभेदात् नमस्कारः। तत्र

नारायणाय हरये नम इत्युदारं
हास्यन् श्वगत्वमपि यः समुदाजहारः ॥२३॥

गजेन्द्रः ।

एकान्तिनो यस्य न कञ्चनार्थं
वाञ्छन्ति ये वै भगवत् प्रपन्नाः ।

कर्म्मयोगे यज्ञाय उपासनारूपाय धर्म्मपतये उपास्यरूपाय विधौ नैपुण्यं यस्य तस्मै उपासकरूपाय. प्रकृतीश्वराय उपास्यरूपाय (सांख्य शिरसि यस्यादरेण गृहीतत्वात् तस्मै उपासकरूपाय-) भक्तियोगे। नारं नमरसूहः अयनं यस्य तस्मै । उपास्यरूपाय नररूपेनोपासकरूपाय नामोच्चारणे उपासनारूपाय हरये हृदये इति सर्व्वत्र विशेषम् । अपरः प्रकारः यज्ञाय श्रुत्यर्थरूपाय। धर्म्मपतये स्मृत्यर्थरूपाय। विधिनैपुणाय सदाचाररूपाय। एभिस्त्रिभिः त्रयोमार्गः उक्तः। योगाय योगेन समाधिना प्राप्याय क्लेशादि चतुष्टयाय परामृष्टाय पुरुषाय। योगाय इति साध्यसाधनयोरभेदोपचारादुक्तम्। सांख्येषु पुरुषप्रकृत्यादितत्त्वेषु शिरसे शिरोवत् प्रधानभूताय पुरुषाख्य तत्त्वरूपायेत्यर्थः। प्रकृत्या स्वभावेन न तूपाधिना ईश्वराय नियन्त्रे नित्यैश्वर्य्याय। पशुपति सदाशिवादि शब्दवाच्यायेत्यर्थः। नारायणांय पञ्चरात्रादितन्त्रेषु निरूप्याय तदेवमार्गं पञ्चकेन प्राप्याय नम इत्यर्थः। शुकः ॥५।१४।४५ (२३)

एकान्तिन इति। यस्यैकान्तिनः अव्यभिचारिणः सेवकाः (यस्य) यस्मात्। कञ्चनमर्थं न वाञ्छन्ति। ये भगवद्भक्ताः (सर्व्वात्मना प्रयत्नेन भगवद्भक्ताः) अत्यद्भुतं तस्य विष्णोश्चरितं

अत्यद्भुतं तच्चरितं सुमङ्गलं
गायन्त आनन्दसमुद्रमग्नाः ॥२४॥

मुचुकुन्दः ।

न कामयेऽन्यं तवपादसेवना-
दकिञ्चन प्रार्थ्यतमादरं विभो ।
आराध्य कस्त्वां ह्यपवर्गदं हरे
वृणीत आर्य्यो वरमात्मबन्धनम् ॥२५॥
तस्माद्विसृज्याशिष ईश सर्वतो
रजस्तमः सत्त्वगुणानुबन्धनाः ।
निरञ्जनं निर्गुणमद्वयं परं
त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥२६॥

विश्वसृष्ट्यादिकरणं एकलक्षिता गायन्ते । गानफलमाह । आनन्द समुद्रमग्ना इति । गजेन्द्रः भगवन्तम् ॥८।३।२० (२४)

नेति । क आर्य्यः ज्ञात्वा (नो) त्वनो बन्धनं वरं वृणीतेनकोऽपीतप्रथ्यः । सर्व्वत्रचैतेषु श्लोकेषु अन्यान (न्या) पेक्षया भजन धर्म्मासक्त्या कोऽप्युत्साहः पुष्यतीति मन्तव्यम् ॥१०।५१।५५ (२५)

तस्मादिति । तदेवं सप्रभेदं वीररसं निरूप्य तद्भङ्ग्या भक्तिरसानुभवितुः फलसम्बन्धं दर्शयन् उपसंहरति । तस्मादिति । तस्माद्वराणामनर्थरूपत्वात् । आशिषः आशास्यमानानि फलानि सर्व्वेशः लोकत्रयवर्त्तिनोरपि । निर्गुणं त्वां व्रजामि । निर्गुणः कुतः यतो निरञ्जनः । अञ्जनं प्रकाशावरणं मायाख्यम् । सगुणोहि

नारदः ।

नामान्यनन्तस्य गतव्रपः पठन्
गुह्यानि भद्राणि कृतानि च स्मरण् ।
गां पर्य्यटन् तुष्टमना गतस्पृहः
कालं प्रतीक्षन् नमदो विमत्सरः ॥२७॥

कुन्ती ।

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः
स्मरन्ति नन्दन्ति तवेहितं जनाः ।

मायासम्बन्धात्त्वंवाचयः । माया सम्बन्धे हि सद्वितीयत्वंस्यात् कुतोऽद्वयः । यतोऽस्तिमात्रः । (मायायाः) सत्ता सत्ताभ्यामनिर्व्वाच्यत्वादित्यर्थः (१) भक्तमहिमातुभक्तिमहिम्नैवोक्त इति अवनोक्तः । सुचुकुन्दः श्रीकृष्णम् ॥१०।५१।५६ (२६)

नामानीति । ईहितस्य च कृतकृत्यतया प्रियातिथिवत् मृत्युं प्रतीक्षकत्वात् न किञ्चिद्वै (कृतम्) कल्मषमस्ति इत्याह । नामानीति । व्रपा लज्जा । कृतानि कर्म्माणि । कालं मृत्युम् । अपदः अस्त्रीकृत स्थानविशेषः । इत आरभ्य नारदः कुन्तीत्यादि शब्दौ वक्तृ निर्देशमात्र विवक्षया न तु भक्ति विवक्षयेति ज्ञेयं विष्णु ग्रहणस्य ज्ञापकत्वात् ॥१।५।११ (२७)

शृण्वन्तीति । एवं भक्तस्य मुख्यत्वाद् ब्रह्मसायुज्यमुक्ता तस्यैव भगवत् सामीप्यादि मुक्तिलिप्सोः स्वाः प्रदर्शयितुकामस्वाह । कुन्तीति । अभीक्ष्णशः पुनःपुनः । नन्दन्ति प्रशंसन्ति । ईहितं

---

(१) सांख्य भाष्य-धृतम् १।२९ "नामरूपानसद्रूपामायानैवोभयात्मिका । सदसद्भ्यामनिर्व्वाच्या मिथ्या भूता सनातनी ।

तएवपश्यन्त्यचिरेण तावकं
भवप्रवाहोपरमं पदाम्बुजम् ॥२८॥

ब्रह्मा ।

यच्च व्रजन्त्यनिमिषा मृषभानुवृत्त्या
दूरे यमाद्युपरिनः स्पृहणीयशीला ।
भर्त्तुर्मिथः सुयशसः कथनानुरागः
वैक्लव्यवाष्पकलया पुलकीकृताङ्गाः ॥२९॥

कर्दमः ।

लोकांश्च लोकानुगतान् पशूंश्च
हित्वा श्रितास्ते चरणातपत्रम् ।

कर्म्मत एव ये श्रवणादिरता: नान्ये । भव: सञ्चार: । सएव प्रवाह: । जलप्रवाहवत् पतितं नमुञ्चन्ति । उच्चावचेषु स्थानेषु पातयतीति प्रवाह: । तस्योपरमाविनाशो यत्र पदाम्बुजेतत्तथा । एतेन सामीप्यरूपा मुक्तिरुक्ता । कुन्ती श्रीभगवन्तम् ॥१।८।३६ (२८)

सालोक्यरूपामाह । यच्चेति । यद्वै कुण्ठं व्रजन्ति दूरेहम: (यमा:) दूरोक्तताद्धारा: । अनिमिषां देवानां ऋषभोविष्णु: । तस्यानुवृत्त्यानो अस्माकं उपरता एतावतस्तो यथापूर्व्वे मन्वन्तरङ्गा: । एवं सार्ष्टि सारूप्येऽपिह्येये ॥३।१५।२५ (२९)

किञ्च सिद्धं पुरुषं भगवत्सालोक्यादि मुक्ति मासादयन्तं विभं-गयिषव: सर्व्वाग्रिम एवसुपमन्त्रयन्ते । तथाहि "अहो अहोएतां स्वर्गे एते ते कस्य पादपा: । इमा अप्सरस: श्राघ्या: सेवरूति पुन: पुन"रित्यादि । तत्रचैवमस्तीति चेतसा सङ्कोनकार्य्य: । नाप्यहं

परस्परं त्वद्गुणवादशोधु-
पीयूषनिर्वापितदेहधर्म्माः ॥३०॥

कविः ।

गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टिनहृष्यति ।
विष्णोर्मायामिदं पश्यन् सवैभागवतोत्तमः ॥३१॥

देहेन्द्रियप्राणमनो धियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः

योग्य इति गर्व्वः । पुनर्दुःख प्रसङ्गात् । तथाच सूत्रम् "स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्" (१) इति । तदेतदभिप्रेत्याह । लोकानिति । लोका इन्द्रभवनादयः । लोकानुगतास्तद्वासिनः । तेषां पशुवदाहार मैथुनमात्र वेदित्वात् पशुतुल्यत्वम् । तान् हित्वा अर्थात् प्रार्थयमानानिति ये श्रिताः तवगुणवाद एव वासनान्तरोत्पादकत्वात् । शोधुर्मद्यम् । रुचिप्रदत्वात् पीयूषं । तेन निर्व्वापितो निष्कासितो देह धर्म्मो विषय वासनारूपोऽसन्तोषरूपश्च यैः तैतथा । मुख्यं य एवं प्राप्नुवन्तः श्रिता इत्यादि (२) तदुक्तं गीतासु "मच्चित्ता" इत्यादि (ये एवं श्रितास्ते प्राप्नुवते इत्यादि योज्यम्) कर्द्दमः कपिलम् ॥३।२१।१७ (३०)

गृहीत्वेति । एवं वैभजमानस्य विदेह कैवल्यमुक्ता सम्प्रत्यारब्ध कर्म्मवशात् देहेसत्यपि विष्णुपद प्राप्ति लक्षणां जीवन्मुक्तिं दर्शयितु मुत्तरग्रन्थ मारभते । कविः ॥११।२।४८ (३१)

स्पष्टं देहेति । इदं जगत् देहस्य जन्माप्ययौ इन्द्रियाणांतर्यौ

---

(१) योगदर्शनम् ३।५० सूत्रम् ।
(१) श्रीमद्भगवद्गीता १०।९ श्लोकः ।

स्मृत्वा हरेर्भागवतप्रधानः ॥३२॥
नकामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः सवैभागवतोत्तमः ॥३३॥
न यस्य जन्मकर्म्मभ्यां न वर्णाश्रम जातिभिः।
सज्जतेऽस्मिन्नहम्भावो देहे वैसहरेः प्रियः ॥३४॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः सवैभागवतोत्तमः ॥३५॥

त्रिभुवनविभवहेतवेऽप्यकुण्ठ
स्मृतिरजितात्मसुरादिभिर्विभृग्यात्।
न चलति भगवत्पदारविन्दात्
लवनिमिषार्द्धमपि यः स वैष्णवाग्रः ॥३६॥

विषयलिप्सारूपः प्राणस्य क्षुत्मनसो भयं धियः क्लेशम् खिन्नत्वम् विवेचनाशक्तिरित्यर्थः ॥११।२।४८ (३२)

न कामेति। कामा एव कर्म्मबीजानि। अथवा बीजं अविद्यादि (१) नित्यनिरतिशय सुखात्मकस्वरूपस्यान्यथा ग्रहणमिति यावत्। ततो वाह्य सुखाभिलाषः कामः। तत् सिद्धये व्यापारः कर्म्म ॥११।२।५० (३३)

नेति। जन्मनाकुलं लक्ष्यते। अहंभावो गर्व्वः ॥११।२।५१ (३४)

नेति। आत्मनि शरीरे स्वः अहं परः नाहमिति भिदा जाता-वेकवचनम्। स्वः मम परो नममेति ॥११।२।५२ (३५)

त्रिभुवनेति। त्रिभुवन विभुर्ब्रह्मा। तद्धेतवे ब्रह्म पदार्थ

---

(१) "अतस्मिन् तदबुद्धिरविद्या" आदिपदेन अस्मितादेर्यहणम्। सा त्रिधा, पारमार्थिकी व्यवहारिकी, प्रातिभासिकी चेति।

भगवत उरुविक्रमाङ्घ्रि शाखा
नखमणिचन्द्रिकया निरस्ततापे ।
हृदिकथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः ॥३७॥

विसृजतिहृदयं न यस्य साक्षात्
हरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरशनयाधृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥३८॥

श्रीविष्णुः

निष्किञ्चना मय्यनुरक्तचेतसः
शान्तामहान्तोऽखिललोकवत्सलाः ।
कामैरनालब्धधियो भजन्ति ते
यन्नैरपेक्ष्यं न विदुः सुखं मम ॥३९॥

मपि न चलति। यतो भगवत्पदं ब्रह्मपदादपि अधिकं तदाह। अजितेति। अजितेविष्णौ आत्मा मनो येषां तैः ॥११।२।५३ (३६)

भगवत इति। सन्तप्तस्य चलनं स्यादिति चेत्तत्राह। भगवत इति। उरुर्विक्रमो यस्याङ्घ्रि, स्तस्य शाखाः अङ्गुलयः तासां तस्यां नखाएव उज्ज्वलत्वाद्रत्नत्वाद्दामणयः तेषां चन्द्रिका प्रभा उपसीदतां भजतां ससन्तापः ॥११।२।५४ (३७)

विसृजतीति। यस्य हृदयं साक्षादनाच्छन्नरूपोहरि र्न विसृजति यतः प्रणय रसनया प्रेमगुणेन धृताङ्घ्रि पद्मः। कविः निमिम् ॥११।२।५५ (३८)

वाग् गद्गदाद्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसते क्वचित् क्वचित्।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥४०॥

राजा।

पुनश्च भूयाद् भगवत्यनन्ते
रतिः प्रसङ्गश्च तदाश्रयेषु।
महत्सु यां यामुपयामि सृष्टिं
मैत्रस्तु सर्वत्र नमो द्विजेभ्यः ॥४१॥

ध्रुवः।

यानिर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।

निष्किञ्चना इति। अनालब्धाः अस्पृष्टाः नैरपेक्ष्यं निरपेक्षैर्लभ्यम्। श्रीकृष्णः उद्धवम् ॥११।१४।१७ (३८)

वागिति। गद्गदास्खलिताक्षराः ॥११।१४।२४ (४०)

पुनश्चेति। एवं जीवन्मुक्तं लक्षयित्वा तन्माहात्म्यं ब्रुवाणः तत्सङ्गिनः पुरुषान् स्तौति। पुनश्चेति। पुनर्जन्मान्तरे तदाश्रयेषु भगवदाश्रयेषु। प्रकृष्टसङ्गोयां यां सृष्टिमुपयामि तत्र तत्र महत्सङ्गी भूयात्। तज्जन्मविशेषं प्रार्थयन् नमो द्विजेभ्य इति पुरःस्थितानृषीन् राजानमपि। परोक्षवत् ऋषीन् प्रति ॥११।१८।१६ (४१)

यानिति। भगवज्जना जीवन्मुक्ताः। स्वमहिमन्यपि स्वाधीन

सा ब्रह्मणि स्व महिम्न्यपि नाथ माभूत्
किं वान्तकासिलुलितात् पततांविमानात् ॥४२॥
ते न स्मरन्त्यतितरां प्रियमीशमर्त्यं
येचान्वदः सुतसुहृद्गृहवित्तदाराः ।
येत्वज्जनाभ भवदीय-पदारविन्द
सौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥४३॥

सूतः ।

तदोपसंहृत्यगिरः सहस्रणी-
र्विमुक्तसङ्गं मन आदिपुरुषे ।
कृष्णे लसत्पीतपटे चतुर्भुजे
पुरःस्थितेऽमीलितदृग्व्यधारयत् ॥४४॥

माहात्म्येऽपि किन्तु किंपुनः। अन्तकस्यासिनालु (तु) लिता द्विमानात् पततां पराधीन माहात्म्यानामित्यर्थः ॥४।८।१० (४२)

तेनेति। मर्त्यं शरीरं प्रियमपि नस्मरन्ति। ये च अदो मर्त्यं अनु अमुना देहेन सहस्थिताः। तत्सम्बन्धात् स्वसम्बन्धिनः सुतादयः तानपि नस्मरन्ति। के ये भगवज्जनेषु कृत प्रसङ्गः ध्रुवो भगवन्तम् ॥४।८।१२ (४३)

एवं जीवन्मुक्तं लक्षयित्वा स्तुत्वा चेदानीं अवसिताधिकारस्य तस्य शरीर पातमाह। तदेति। तदा तस्यां दशायां सहस्रणीः (स्राणि) सहस्रेण व्यापाराणां लब्धबलाः गिरः उपसंहृत्येतेन सर्वेन्द्रियोपरतिरुपलक्षिता। अतएव विमुक्त सङ्गं मीलिताक्षुद्बुद्धी-

विशुद्धया धारणया हता शुभ-
स्तदीक्षयैवाशुगतायुधव्यथः ।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रम
स्तुष्टाव जन्यं विसृजन् जनार्दनम् ॥४५॥

रुद्रः ।

प्रत्युद्गमप्रश्रयणाभिवादनं
विधीयते साधुमिथः सुमध्यमे

न्द्रियवृत्तिः यस्मिन् मनसि निधाय मनः क्षणे अधारयदित्यर्थः । अनेन प्रत्याहार पूर्व्वा धारणोक्ता (१) ॥१।८।३० (४४)

विशुद्धा निष्कामाः अशुभं पूर्व्वभवं तस्य श्रीकृष्णस्य ईक्षया साक्षात्कारेण गतानि आयुधव्यथानि यस्य सतथा । आयुधवत्-व्यथयन्ति इत्यायुधव्यथानि उत्तर पापानि । तथाचोक्तम् तदधिगम उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् (२) । श्रुतिश्च यथेषीका तूलमग्नौ प्रोतं प्रदूयते एवंहास्य सर्व्वे पाप्मानः प्रदूयन्ते (३) इति । विभ्रमो विविधं भ्रमणं । तत्र तत्रासन्तोषात् । तस्य-निर्वृतिरपूर्व्वं क्षणाख्य विषयलाभात् जन्यं शरीरं विसृजन् त्यजन् । जनार्दनं कैवल्यदातारं पुरुषमित्युचित पदप्रयोगः । सूतः शौनकम् । स्तुतिरिह मनसा भगवद्गतसाधुत्वानुसन्धानम् । वाचिकस्यतु व्यवहारदशा विषयत्वात्तदेवाह ॥१।८।३१ (४५)

प्रत्युद्गमेति । प्रश्रयणं विनयः । प्रत्युद्गमादिकं सत्कारो-पलक्षणम् । हे सुमध्यमे दाक्षायणि । तत्सर्व्वं प्राज्ञैः प्रज्ञाऽव-

---

(१) योगदर्शनम् "देशबन्धश्चित्तस्य धारणा" ३।१ सूत्रम् ।
(२) वेदान्तदर्शनम् ।४।१।१३ सूत्रम् ।
(३) कौषीतक्युपनिषत् ५।२४।३

प्राज्ञैः परस्मै पुरुषाय चेतसा
गुहाशयायैव न देहमानिने ॥४६॥
सत्त्वं विशुद्धं वसुदेवशब्दितं
यदीयते तत्र पुमानपावृतः ।
सत्त्वे च तस्मिन् भगवान् वासुदेवो
ह्यधोक्षजो मे नमसा विधीयते ॥४७॥

शुकः ।

उद्गायतोनामरविन्दलोचनं

ऋतम्भराख्या सास्ति येषां तैः । परस्मै तुरीयाय । चेतसव विधीयते । अर्थादन्यैस्त्वन्यथेत्यर्थः । ऋतम्भरालक्षणन्तु (१) "वुद्ध्यभिव्यक्तं पुरुषं वुद्धिसङ्गविवर्ज्जितम्, यादर्शयति वोधार्कंसा-मोक्षेस्याद्दृतम्भरा" इति । एवमियता प्रवन्धेन विष्णुादि प्रकरण चतुष्टयीं साङ्गां सकलां च निरुप्याथग्रन्थकृत् प्रकरण प्रतिपाद्या-मिष्ट देवतां प्रणमति । सत्त्वमित्यादि । मे मया भगवानधोक्षजो वासुदेवो हि (च) मनसाविधीयते । नमस्क्रियते । अधःकृतमक्ष-जमिन्द्रियजं ज्ञानं येन सतथा । निराकार इत्यर्थः । कथन्तर्हि वासुदेव स्तत्राह । सत्त्वे चेति । तस्मिन् वासुदेवाख्ये उपाधौ अ (य) स्यसत्त्वे सद्भावे अधिष्ठाने स (इ) ति । अथ वासुदेवशब्दस्य कोऽर्थ स्तत्राह ॥४।३।२२ (४६)

सत्त्वमिति । यद् यस्मात्तत्र विशुद्धे सत्त्वे पुमान् विष्णुरपावृत ईयते । प्रत्यक्षः प्रतीयते । अनेन वसत्यस्मिम् रमणीयत्वादिति वसु । दीव्यतिद्योततेऽस्मिन् प्रकाशकत्वादिति देव इति शुद्धसत्त्वे

---

(१) पातञ्जले समाधिपादे ४७।४८ सूत्रे ऋतम्भरातत्र प्रज्ञा ।

व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः।
दघ्नश्च निर्म्मन्थनशब्दमिश्रितो
निरस्यते येन दिशाममङ्गलम् ॥४८॥
स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजताद्धोक्षजे
आविश्यतां नो मतिरप्रहैतुकी ॥४९॥

इति श्रीवोपदेव विरचिते मुक्ताफले विष्णुभक्तानां वोररसो नामैकोनविंशोध्यायः।

वसुदेवशब्दस्य प्रवृत्तौ हेतुरुक्तः। तदेवं साकार निराकारे भगवतोर्द्वे रूपे नमस्कृते भवतः। रुद्रः उमाम् ॥४।३।२३ (४७)

अथास्य ग्रन्थस्यप्रचय परिपन्थि विघ्न विघाताय भगवद्गुणमाहात्म्य परं पद्यमुदाहरति। उद्गायतीनामिति। दघ्नश्चध्वनिः। निर्म्मथ्यतेऽनेनेति निर्म्मन्थनं कुठरादि। कूट (ठ) रोमग्र्य विष्कम्भेतस्य शब्देनमिश्रितः। येन ध्वनिना निरस्यतेतिरस्क्रियते। अमङ्गल मित्येतन्निर्व्विघ्नत्वे द्योतकं शुकः ॥१०।४६।४६ (४८)

स्वस्तीति एवं जगदपवर्गहेतुं ग्रन्थं प्रणीय तज्जनित सुकृतवासनासनाथ। तत्र तत्र भगवानाचार्य्यो विश्वस्य स्वस्य च समीहितमाशास्ते। स्वस्त्यस्तु इति। स्वस्तीति क्षेमवाचकमव्ययम्। ननु खलेषु सत्सु कुतः स्वस्ति तत्राह। खल इति। खलो दुर्ज्जनः। प्रसादः स्वच्छत्वम्। विश्वस्य स्वस्तिप्रतिज्ञाभङ्गभयात् खलस्य प्रसादमात्रमुक्तम् न तु विनाशः। एवं योग्यतामुक्त्वा परस्परोपकारे प्रवृत्तिमाह

ध्यायन्तीति। शिवं मङ्गलम् स्वागतमाशास्ते मनश्चेति। नः अस्माकं च मनो भद्रं सात्त्विकं वस्तु भजतात्। अपि शब्दः समुच्चये। अधोक्षजे नो मतिरावेश्यताम्। आवेशं प्राप्नोति आवेशयतीति। "प्रातिपदिकत्वात् धात्वर्थे बहुलमिष्टवच्चेति" णिच्। अहैतुकी-निष्कामा। प्रह्लादः नृसिंहम् ॥ ५।१८।९ (४९)

इति हेमाद्रि विरचितायां कैवल्यदीपिकायां विष्णुभक्तानां

वीररसोनामैकोनविंशोध्यायः।

ग्रन्थोपसंहारः

चतुरेण चतुर्व्वर्गं चिन्तामणि वणिज्यया ।
हेमाद्रिणार्ज्जितं मुक्ताफलं पश्यत कौतुकात् ॥५०॥
निर्म्मथ्यपयसांराशिं मन्दरः कौस्तुभं न्यधात् ।
हेमाद्रिर्व्वचसां मुक्ताफलं रत्नं हृदि प्रभोः ॥५१॥

ग्रन्थोपसंहार वार्त्तादीनाम् । इहच स्वकर्त्तृकेऽपि यदुराज महामन्त्रिणा हेमाद्रिणाऽभ्यर्थित आचार्य्य स्तत्कर्त्तृकत्वं ख्यापितवानिति प्रागुक्तम् । तदेतत्पर्य्यन्तं तत्कीर्त्तिं ख्यापयन्नाह चतुरेणेति चतुर्वर्ग चिन्तामण्याख्य ग्रन्थमहोदधेर्वणिज्यतया चतुरेण विदित ग्रन्थरचनारीतिविशेषेण । यथाहि वणिज्यायां तत्तद्देशेभ्यस्तानि तानि प्रियवस्त्वन्याहृत्यपुमान् तत्तद्विषये चतुरोभवति । तथैतेन तत्तत्स्मृतीतिहास पुराणादिभ्य स्तानि निःशेष व्रत-दान-तीर्थ-मोक्षादिप्रतिपादन पराणि वाक्यान्याहृत्य ग्रन्थरचनायां कौशलमासादितम् । तत स्तस्यैवरेखया भागवतस्य तत्तत्स्कन्धेभ्य स्तानितानि विष्णु दि वस्तुचतुष्टय प्रतिपादन पराणि पद्यान्युद्धृत्य (आहृत्य) मुक्ताफलाख्यं प्रकरणं कृतम् । तदेतत् कौतुकात्पश्यत हे कुतूहलिनः इतिशेषः । अस्मिन् विलोकिते सकल कौतुकमवाप्स्यथेतिभावः । अन्यत्र चतुर्णाम्वर्गाः देशच्छायाः समूहास्तेषां चिन्तापरीक्षा तयोपलक्षिताः मणयो रत्नानि तेषां वणिज्या क्रय विक्रय स्थितिः । तया चतुरेण निपुणेन हेमाद्रिणा बहुसुवर्णेन वणिजा अर्ज्जितं मुक्ताफलम् मौक्तिकानि । जातावेकवचनम् । पश्यतेत्यर्थः । मुक्ताफलशब्दः पद्यहृद्येऽपि प्राग्व्याख्यातः ॥५०॥

एवं तस्य वणिग्रूपेण कुशलतांव्यञ्जय सुमेरुसाम्येन स्थैर्य्यादिगुणान्व्यनक्ति । निर्म्मथ्येति । पयसांराशिम् क्षीरोदंमन्दरोमहाचलः

हेमाद्रि माद्रियत एव गुणेन येन
तेनैव पूरित सुखेन सुबद्ध मेतत् ।
मुक्ताफलं प्रतिफलज्जगदीशरूपं
यत्कर्णकण्ठ कुहरे सुषमास्य काचित् ॥५२॥
इे एव चित्ते रामस्य सिन्दुर्व्वङ्गः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सुर्य्यावर्त्तं प्रदक्षिणः ॥५३॥

न्यधानिच्चिप्तवान् । हेमाद्रिर्म्मेरुः कामदेवात्मजश्च वचसां राशिं भागवताख्यं निर्म्मथ्य मुक्ताफलाख्यं रत्नं ग्रन्थञ्च प्रभोः श्रीकृष्णस्य हृदिन्यधादित्यर्थः । विष्णोरयमलङ्कार इतिभावः ॥५१॥

हेमाद्रि मित्यादि । येन सकल कथा कौशलरूपेण गुणेन हेमाद्रिंजन आद्रियते सत्कुरुते तेनैव गुणेन पूरितं तत्साधन सम्पादनादर्द्धिणां सुखं येन गुणेन । अर्द्धिजनेषु कल्पतरवोच्चितस्य गुणाः । एतत्प्रकरणं सुबद्धं सुघटितं प्रतिफलन् बुद्धिदर्पणे प्रतिविम्बीभवत् जगदीशस्य विष्णोः रूपं येन यस्मिन् ग्रन्थेन तत्तथा । तुल्याधिकरणाद्बहुव्रीहेः प्रशंसायां रूपप्रत्ययो वा सर्व्वथा राजालङ्करणमित्यर्थः । तदेतत् यस्य कर्णे श्रवणे कण्ठे घोषेण हृदये तदर्थचिन्तनेनाङ्ग तस्य पुंसः काचित् स्वसम्वेद्याद्या सुषमा परमात्म प्रकाशरूपा परमशोभा भवतीत्यर्थः अन्यत्रतु येन गुणेन सूत्रेण हेमाद्रेः सुमेरोर्मालक्ष्मीः शोभा आद्रियते । मेरुविकारस्य सुवर्णस्य निकटस्थतया स्वीक्रियते तेनपूरितं भृतं (शृतं) स्वप्रवेशेन सुखं मौक्तिकवेध्यस्थानं येन गुणेन तेनैव एतद्ग्रन्थरत्नं सुबद्धं सुयन्त्रितं प्रतिफलत् निर्म्मलतया प्रतिविम्बी भवत् जगदेव ईशस्यरूपं यस्मिन् मौक्तिके । यद्वाप्रतिफलन् जगदीशस्य राज्ञोरूपं यस्मिन् तत्तथा ॥५२॥

विद्वज्जनेश-शिष्येण भिषक् केशव सूनुना ।
हेमाद्रिर्व्वीपदेवेन मुक्ताफल मचीकरत् ॥५४॥
स्वर्गे गीर्व्वाणिनार्य्यः सुरपतिमभितः शाब्दिकामां वरेण्यः
पाताले नागराजः फणिपतिसदृशो यस्यगायन्तिकीर्त्तिम् ।
यस्तोर्णः शास्त्रपाथोनिधिमखिल मथो ग्रन्थरत्नं सुवृत्तम्,
चक्रे शिष्यैर्धनेशः कविकुलतिलकः केशविर्व्वीपदेवः ॥५५॥

हे एवेति । रामोदाशरथिर्देवगिरोश्वरश्च । तस्य पुरा त्रेतायां चरित्रेषु मध्ये हे एव चरित्रे यत्सिन्धुः खमुद्रोवहः । यच्च हेमाद्रिः मेरुः खमुपानोतः खस्य निकटीकृतः । किम्भूतः सूर्य्यस्यरवेः आवृता व्याप्तत्तिंगता प्रदक्षिणा परिभ्रमणा (णा) यस्मिन् मेरौ सतथा व्यधिकरण बहुव्रीहीतु प्रागुक्तम् । कार्य्यकारणयोरभेदोपचारेण ताटस्थ्य (तच्छब्द) विवक्षया हेमाद्रिशब्देन तज्जं सुवर्णं लक्ष्यते । अर्थिभ्यः प्रदातुं भूयान् सुवर्णराशिरानीत इत्यर्थः । अन्यत्त्रैवतस्य तु रामस्य अधुना यदुकुलेऽवतोर्णस्य हेएवचित्रे यत् सिन्धुर्गजमदोवहः । अत्र सिन्धुशब्देन तद्दन्तोगजालक्ष्यन्ते । सिन्धुरिति जातावेकवचनम् । प्रत्यर्थिनोराज्ञः परासूय तत्सिन्धुराः खगृहे वहा इत्यर्थः । यच्च हेमाद्रिर्द्विजविशेषः । खमुपानीतः खसाम्राज्यस्य महामात्यस्य पदेऽधिकर्त्तुमित्यर्थः । कीदृशः सूरिषु पद वाक्यप्रमाणादि प्रवोणेषु आवृताः शतशः क्रियमाणत्वादावृत्तिंगता । प्रकृष्टादक्षिणा दानं यस्य सतथा । कोहि नाम बृहस्पतिमपि प्रज्ञया प्रहसत स्ताटस्थ्यमन्विगिरोमणे र्निजनिकटीकरणान्न चित्रीयते ॥५३॥

विद्वज्जनेश शिष्येणेति अतिरोहितार्थम् ॥५४॥

सकल विबुधमानः श्रीनिकेतं वदान्यः,
समद विबुध सिंहः श्रीनिवासाङ्घ्रि सेवेशः ।
जयति विनयसिन्धु वामनेशः सुबन्धुः
प्रणत-सकल भूपः कृष्णवंशैकदीपः ॥५६॥

इति श्रीवोपदेव विरचितं मुक्ताफलं

समाप्तम् ॥

इति ग्रन्थोपसंहारः ।

सकलान् विबुधान् मानयतीति तथा श्रीनिकेतं ऐश्वर्य्याधारं वदान्यः दानशौण्डः । समदा ये विबुधा स्तेषां सिंहः कविकेशरी । भगवच्चरणारविन्दे स्नेहो भक्तिः तद्युक्तःवामनः ईशोयस्य श्रेष्ठावन्धवः (सुशोभना वन्धवः वान्धवाः) सभासदो यस्य एतादृशो देवगिरीश्वरो रामो यतिः ॥५५॥५६॥

योनित्य शुद्ध सुखबोध वपुर्णितान्तं,
जागर्त्ति चोमिति पदं यमिहापवर्ग्यम् ।
यो योगिनां हृदि चकास्ति विधूत पङ्के,
सोऽस्माकमस्तु शरणं पुरुषः पुराणः ॥१॥
यत्किञ्चिदत्र भवतः खलु वोपदेव,
सूरेः कृतिर्निजधिया परिचर्य्यते मे ।
उद्दिश्य कोविदजनोपकृतिं तदारात्,
आराधनं भगवतः परमेश्वरस्य ॥२॥
क्षायावतो मरुतदामपिनैकचित्राम्,
पुष्पप्रयामिव भुवि प्रथितां तदीयाम् ।

टीकां प्रियां परमहंस जनस्य दृष्ट्वा,
ग्रन्थः कृतोऽत्र कृतिनां हृदुपैतु (ति) तोषम् ॥३॥
अतत्वे तत्वधीर्येषां तत्वेचातत्त्व धीर्नृणाम्।
नतानानन्दयन्त्येता वोपदेवस्य सूक्तयः ॥४॥
यस्य व्याकरणे वरेण्य घटना स्फोताः प्रबन्धादश,
प्रख्यातानव वैद्यकेऽथतिथि निर्द्धारार्थ मेकोद्गतः।
साहित्येचय एव भागवत तत्त्वोक्तिरेक स्तथा,
भव्याद्वाणी शिरोमणेरिहगुणाः के के न लोकोत्तराः ॥५॥
टीकामुक्ताफलस्येमां नाम्ना कैवल्यदीपिकाम्।
हेमाद्रिः कण्ठके चक्रेरा (का) मराजस्य वेश्मनि ॥६॥

इति श्रीमत् प्रौढ़ प्रतापचक्रवर्त्ति—महाराजाधिराज
सोमयदुवंशोद्भव रामराज-मन्त्रिवर्य्य हेमाद्रि
विरचिता मुक्ताफलटीका समाप्ता ॥

—*—